CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आँ. आ० नं०-५४५३(क)R.
नं०-४६-८४

THE

SÁHITYA-DARPAṆA,

OR

MIRROR OF COMPOSITION,

A

TREATISE ON LITERARY CRITICISM;

BY

VIŚWANÁTHA KAVIRÁJA.

श्रीविश्वनाथकविराजविरचितं
साहित्यदर्पणं नामअलङ्कारशास्त्रम् ।

CALCUTTA:

PRINTED AND PUBLISHED

BY

BÁBU BHUVANA CHANDRA VASÁKA,

At the Sangbáda Jnánaratnákara Press,

No. 8. Nimtollah Ghaut Street.

1869.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

साहित्यदर्पणस्य परिच्छेदतात्पर्य्यम् ।

परिच्छेदः	तात्पर्य्यम् ।	
१मः..	काव्यस्वरूपनिरूपणम्	१ – ८ पृष्ठा
२यः..	वाक्यस्वरूपनिरूपणम्	९ – २२ „
३यः..	रसभावादिनिरूपणम्	२३ – ९९ „
४र्थः..	ध्वनिगुणीभूतव्यङ्ग्याख्यकाव्यभेदनिरूपणम्..	१०० – ११७ „
५मः..	व्यञ्जनव्यापारस्थापनम्	११८ – १२४ „
६ष्ठः..	दृश्यश्रव्यकाव्यनिरूपणम्	१२५ – २११ „
७मः..	दोषनिरूपणम्	२१२ – २४६ „
८मः..	गुणविवेचनम्	२४७ – २५३ „
९मः..	रीतिविवेचनम्..	२५४ – २५६ „
१०मः..	अलङ्कारनिरूपणम्	२५७ – ३४६ „

साङ्कित मोहरव्यतीत पुस्तक क्रय करण निषेध ।

S.G.R. PRESS
PRINTING
BINTOLLA GHAUT ST. CALCUTTA
19 MAY
1869

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सा. 9333 R.

साहित्यदर्पणधृतग्रन्थनामानि ।

नाम	पृष्ठा	पंक्तिः
अनर्घराघवः	१२८	११
आग्नेयपुराणम्	२	११
आर्याविलासः	२०९	४
उदयनचरितम्	१६९	२१
उदात्तराघवः	१२९	२१
कनकावतीमाधवः	२०५	२
कन्दर्पकेलिः	२००	८
कर्णपराक्रमः	२०९	१
कर्पूरमञ्जरी	२०२	१
कादम्बरी	२१०	६
कामदत्ता	२०६	१३
कुन्दमाला	९५	१४
कुम्भः	१८३	१६
कुमारसम्भवः	५२	३
कुवलयाश्वचरितम्	२०८	१९
कुसुमशेखरविजयः	१९४	१७
कृत्यारावणः	१७०	५
केलिरैवतकम्	२०६	१
क्रीड़ारसातलम्	२०४	६
गृहवृक्षवाटिका	१८१	२०
चण्डकौशिकः	१५४	२
चन्द्रकला	१५२	११
छलितरामः	१९७	१८
जानकीराघवम्	१५५	४
त्रिपुरदाहः	१९४	१
देवीमहादेवम्	२०२	१८
देशराजचरितम्	२११	१
धूर्त्तचरितम्	२००	१०
नटकमेलकम्	२००	१३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नाम	पृष्ठा	पंक्ति
नर्म्मवती	२०२	७
नागानन्दः	९२	१३
नैषधचरितम्	२०८	१३
पञ्चतन्त्रम्	२१०	१८
पुष्पभूषितम्	१९१	१२
पुष्पमाला	१२८	१२
प्रभावतीपरिणयः	१९७	२
प्रशस्तिरत्नावली	२११	५
बालरामायणम्	१२७	१६
बालचरितम्	१४७	१९
बिन्दुमती	२०५	१५
बिरुदमणिमाला	२११	३
भाषार्ण्ववः	१७४	२
भरतशास्त्रम्	९६	१५
भिक्षाटनम्	२०९	४
महाभारतम्	९	१०
मायाकापालिकम्	२०४	१
मालतीमाधवम्	३३	११
मालविकाग्निमित्रम्	१९९	९
मुक्तावली	२०९	९
मुद्राराक्षसम्	१३२	३
मेनकाहितम्	२०३	१७
मेघदूतम्	२०९	६
ययातिविजयः	१७६	१
याटवोदयः	२०३	५
रघुवंशः	९	१०
रङ्गदत्तम्	१९१	१२
रत्नावली	३३	७
राघवविलासः	२०८	१४
राघवानन्दः	४९	१
राघवाभ्युदयः	१८७	१७
रामचरितम्	१४०	१५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नाम	पृष्ठा	पंक्तिः
रामायणम्	९	१०
रामाभिनन्दः	१३८	१
रामाभ्युदयः	१७१	४
रैवतमदनिका	२०१	१७
लीलामधुकरः	१९२	४
वालिवधः	२०३	१०
विक्रमोर्वशी	९४	१७
विष्णुपुराणम्	२	१४
विलासवती	२०२	८
वीरचरितम्	१५३	२
वेणीसंहारः	१३२	१४
शर्म्मिष्ठाययातिः	१९५	५
शाकुन्तलम्	१३०	१६
शारीरिकमीमांसाभाष्यव्याख्यानम्	२८६	१९
शिशुपालवधः	२०८	१३
शृङ्गारतिलकम्	२०२	१३
समुद्रमथनम्	१९३	१३
सेतुबन्धः	२०८	१९
हयग्रीववधः	९७	१७
हर्षचरितम्	२१०	१२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

साहित्यदर्पणधृतग्रन्थकृन्नामानि ।

नाम	पृष्ठा	पंक्तिः
अभिनवगुप्तपादाः	१४१	२
अभिहितान्वयवादी	२२	७
उदयनाचार्य्यः	१२०	११
कालिदासः	१२८	२१
चण्डीदासः	२०५	१२
चन्द्रशेखरः	१८	२०
चाणक्यः	१६८	१५
दण्डी	२१०	१६
धर्मदत्तः	२३	१८
नारायणः	२३	१७
ध्वनिकारः	३	१२
पुरुषोत्तमः	२५४	१७
भर्तृहरिः	३२	४
भोजः	२५५	६
महिमभट्टः	१२४	५
मुनिः	१३३	६
मुनीन्द्रः	९३	१३
राघवानन्दः	७	९
रुद्रटः	१६५	२
वक्रोक्तिजीवितकारः	४	२१
वाचस्पतिमिश्राः	२८६	१९
वामनः	६	१३
व्यक्तिविवेककारः	६	५
श्रीमल्लोचनकारः	९७	१४
श्रौत्रियजरन्नीमांसकः	२६	३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सूचीपत्रम् ।

प्रकरणम्	परिच्छेदसंख्या ।	कारिकासंख्या ।
अङ्कलक्षणम्	... ६	... ५१९
अतद्गुणः, अलम्	... १०	... ७४७
अतिशयोक्तिलक्षणतद्भेदाः	... १०	... ६९७–९८
अधिकं, अलम्	... १०	... ७२३
अधीरालक्षणम्	... ३	... १०६
अनुकूलं, अलम्	... १०	... ७१३
अनुकूलनायकः	... ३	... ७३
अनुप्रासः, अलम्	... १०	... ६३३
अनुभावाः	... ३	... १६२
अनुमानं, अलम्	... १०	... ७११
अनुद्देशः, अलम्	... १०	... ७३२
अन्तःपुरसहायाः	... ३	... ८१
अन्त्यानुप्रास, अलम्	... १०	... ६३७
अन्योन्यं, अलम्	... १०	... ७२४
अपह्नुति, अलम्	... १०	... ६८३–८४
अप्रस्तुतप्रसंशाभेदाः	... १०	... ७०६
अभिधामूला व्यञ्जना	... २	... १६
अभिधावृत्तिकथनम्	... २	... १२
अभिनयलक्षणविभागौ	... ६	... २७४
अभिसारस्थानकथनम्	... ३	... ११७
अभिसारिकालक्षणम्	... ३	... ११५
अर्थचिन्तनसहायाः	... ३	... ८०
अर्थगतदोषाः	... ७	... ५७६
अर्थवैविध्यकथनम्	... २	... ११
अर्थप्रकृतिलक्षणतद्भेदाः	... ६	... ३१७–३२३
अर्थान्तरन्यासतद्भेदाः, अलम्	... १०	... ७०९
अर्थापत्तिः, अलम्	... १०	... ७३७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रकरणम्	परिच्छेदसंख्या।	कारिकासंख्या।
अर्थोपक्षेपकभेदप्रकार-तल्लक्षणानि	... ६	... ३०८ – ३१२
अलङ्कारस्वरूपकथनम्	... १०	... ६३१
अवस्थाभिः सन्धिनामका इतिवृत्तस्य पञ्चभागभागाः	... ६	... ३३० – ३३७
असङ्गतिः, अलम्	... १०	... ७१९

आ

आक्षेपतद्भेदौ, अलम्	... १०	... ७१४
आधिकारिकप्रासङ्गिकौ नाट्यवस्तुभेदौ	... ६	... २९६
आमुखलक्षणतद्भेद-तत्तल्लक्षणानि	... ६	... २८७ – २९३
आरभटीभेदास्तल्लक्षणानि च	... ६	... ४२० – ४२३
आर्थी व्यञ्जना तद्भेदकथनञ्च	... २	... २७ – २८
आलम्बनविभावाः	... ३	... ६३

ई

ईहामृगलक्षणम्	... ६	... ५१८

उ

उत्कर्षः, अलम्	... १०	... ७३१
उत्प्रेक्षास्वरूपतद्भेदाः, अलम्	... १०	... ६८६ – ६९२
उदात्तं, अलम्	... १०	... ७५२
उद्दीपनविभावाः	... ३	... १६०
उपमातद्भेदाः, अलम्	... १०	... ६४३ – ६६७
उपरूपकभेदाः, (दृश्यकाव्यं)	... ६	... २७६
उपादानलक्षणा	... २	... १४
उल्लाप्यलक्षणम्	... ६	... ५४५
उल्लेखः, अलम्	... १०	... ६८२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रकरणम्	परिच्छेदसंख्या।	कारिकासंख्या।
ए		
एकरसगतस्थायिभावस्य रसान्तरे सञ्चारित्वकथनम्	... ३	... २०४
एकावली, अलम्	... १०	... ७३०
ओ		
ओजोगुणः	... ८	... ६०९
औ		
औदार्यं, नायिकालङ्कारः	... ३	... १३४
क		
कन्यकालक्षणम्	... ३	... ११०
करुणादीनां रसत्वसंस्थापनम्	... ३	... ३४
कलहान्तरितालक्षणम्	... ३	... ११७
कान्तिः नायिकालङ्कारः	... ३	... १३०
कारणमाला, अलङ्कारः	... १०	... ७२८
काव्यलक्षणं, उपरूपकभेदः	... ६	... ५४६
काव्यनिष्ठगुणादिस्वरूपम्	... १	... ५
काव्यनिष्ठदोषस्वरूपम्	... १	... ४
काव्यफलानि	... १	... २
काव्यभेदौ तत्प्रकारभेदाश्च	... ४	... २५० – २६६
काव्यलिङ्गं, अलम्	... १०	... ७१०
काव्यस्वरूपम्	... १	... ३
किलकिञ्चितं, नायिकालङ्कार	... ३	... १४०
कुट्टमितं, नायिकालङ्कारः	... ३	... १४२
कुतूहलं, नायिकालङ्कारः	... ३	... १५०
कुलजावेश्याप्रेष्याणामभिसारावस्थाकथनम्	... २	... ११६
केलिः, नायिकालङ्कारः	... ३	... १५३
कौशिकीवृत्तिस्तदङ्गानि च	... ६	... ४११ – ४१५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रकरणम्	परिच्छेदसंख्या।	कारिकासंख्या।
अर्थोपक्षेपकभेदप्रकार-तल्लक्षणानि	... ६	... ३०८–३१२
अलङ्कारस्वरूपकथनम्	... १०	... ६३१
अवस्थाभिः सन्धिनामका इतिवृत्तस्य पञ्चभागभागाः	... ६	... ३३०–३३७
असङ्गतिः, अलम्	... १०	... ७१९

आ

आक्षेपतद्भेदौ, अलम्	... १०	... ७१४
आधिकारिकप्रासङ्गिकौ नाट्यवस्तुभेदौ	... ६	... २९६
आमुखलक्षणतद्भेद-तत्तल्लक्षणानि	... ६	... २८७–२९३
आरभटीभेदास्तल्लक्षणानि च	... ६	... ४२०–४२३
आर्थी व्यञ्जना तद्भेदकथनञ्च	... २	... २७–२८
आलम्बनविभावाः	... ३	... ६३

ई

ईहामृगलक्षणम्	... ६	... ५१८

उ

उत्कर्षः, अलम्	... १०	... ७३१
उत्प्रेक्षास्वरूपतद्भेदाः, अलम्	... १०	... ६८६–६९२
उदात्तं, अलम्	... १०	... ७५२
उद्दीपनविभावाः	... ३	... १६०
उपमातद्भेदाः, अलम्	... १०	... ६४३–६६७
उपरूपकभेदाः, (दृश्यकाव्यं)	... ६	... २७६
उपादानलक्षणा	... २	... १४
उल्लाप्यलक्षणम्	... ६	... ५४५
उल्लेखः, अलम्	... १०	... ६८२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रकरणम्	परिच्छेदसंख्या।	कारिकासंख्या।
ए		
एकरसगतस्थायिभावस्य रसान्तरे सञ्चारित्वकथनम्	... ३	... २०४
एकावली, अलम्	... १०	... ७३०
ओ		
ओजोगुणः	... ८	... ६०९
औ		
औदार्यं, नायिकालङ्कारः	... ३	... १३४
क		
कन्यकालक्षणम्	... ३	... ११०
करुणादीनां रसत्वसंस्थापनम्	... ३	... ३४
कलहान्तरितालक्षणम्	... ३	... ११७
कान्तिः नायिकालङ्कारः	... ३	... १३०
कारणमाला, अलङ्कारः	... १०	... ७२८
काव्यलक्षणं, उपरूपकभेदः	... ६	... ५४६
काव्यनिष्ठगुणादिस्वरूपम्	... १	... ५
काव्यनिष्ठदोषस्वरूपम्	... १	... ४
काव्यफलानि	... १	... २
काव्यभेदौ तत्प्रकारभेदाश्च	... ४	... २५० – २६६
काव्यलिङ्गं, अलम्	... १०	... ७१०
काव्यस्वरूपम्	... १	... ३
किलकिञ्चितं, नायिकालङ्कार	... ३	... १४०
कुट्टमितं, नायिकालङ्कारः	... ३	... १४२
कुतूहलं, नायिकालङ्कारः	... ३	... १५०
कुलजावेश्याप्रेष्याणामभिसारावस्थाकथनम्	... २	... ११६
केलिः, नायिकालङ्कारः	... ३	... १५३
कौशिकीवृत्तिस्तदङ्गानि च	... ६	... ४११ – ४१५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रकरणम्	परिच्छेदसंख्या।	कारिकासंख्या।
ख		
खण्डितालक्षणम्	... ३	... ११४
ग		
गद्यस्वरूपतद्भेदतल्लक्षणानि	... ६	... ५६६ – ५७१
गर्भाङ्कः	... ६	... २७९
गर्भाङ्कभेदस्तत्तल्लक्षणानि च	... ६	... ३६५ – ३७७
गाम्भीर्य लक्षणम्	... ३०	... ९३
गुणभेदाः	... ८	... ६०५
गुणलक्षणम्	... ८	... ६०४
गोष्ठीस्वरूपम्	... ६	... ५४१
च		
चकितं, नायिकालङ्कारः	... ३	... १५२
चित्रं, अलम्	... १०	... ६४५
छ		
छेकानुप्रासः	... १०	... ६३४
ड		
डिमलक्षणम्	... ६	... ५१७
त		
तद्गुणः, अलम्	... १०	... ७४६
तपनं, नायिकालङ्कारः	... ३	... १४७
तुल्ययोगिता, अलम्	... १०	... ६९५
तुल्यलक्षणा, अलम्	... १०	... ७४४
तेजोललितौदार्य्यलक्षणानि	... ३	... ९५
त्रोटकस्वरूपम्	... ६	... ५४०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रकरणम्	परिच्छेदसंख्या।	कारिकासंख्या।
ट		
टक्षिणनायकः	... ३	... ७१
टण्डसहायाः	... ३	... ८२
देशभेदैःसामान्यस्त्रीभेदाः[१६]	... ३	... ११२
टीपकं, अलम्	... १०	... ६९६
टीप्निः, नायिकालङ्कारः	... ३	... १३१
दुर्म्मल्लिकालक्षणम्	... ६	... ५५३
दूतदूतीलक्षणविभागौ	... ३	... ८६
दूतीगुणाः	... ३	... १५८
दूतीनिरूपणम्	... ३	... १५७
दृष्टान्तः, अलम्	... १०	... ६९८
दोषस्वरूपतद्भेदाः	... ७	... ५७२ – ७५
द्विप्रकारीभूतकाव्यस्य दृश्यश्रव्य-भेदेन पुनः प्रकारद्वयकथनम्	... ६	... २७२
ध		
धर्म्मसहायाः	... ३	... ८३
धीरप्रशान्तलक्षणम्	... ३	... ६९
धीरललितलक्षणम्	... ३	... ६८
धीराधीरालक्षणम्	... ३	... १०५
धीरोदात्तलक्षणम्	... ३	... ६६
धीरोद्धतलक्षणम्	... ३	... ६७
धृष्टनायकः	... ३	... ७२
धैर्य्यलक्षणम्	... ३	... ९४ – १३५
न		
नाटककार्य्यपूर्व्वरङ्गना-न्दीपाठलक्षणादिः	... ६	... २७
नाटकरूपप्रकारनिर्व्वचनम्	... ६	... २७७ – १७८
नाटिकास्वरूपकथनम्	... ६	... ५३९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रकरणम्	परिच्छेदसंख्या।	कारिकासंख्या।
नाट्यभाषाविभागः	... ६	... ४३२
नाट्यरासकलक्षणम्	... ६	... ५४३
नाट्यालङ्कारभेदास्तत्तल्लक्षणानि च	... ६	... ४७१ – ५०३
नाट्येलक्षणानि	... ६	... ४३४ – ४७०
नाट्योक्तीनां निरूपणम्	... ६	... ४२५ – ४३१
नायकगुणाः, [८]	... ३	... ८९
नायकप्रथमभेदाः	... ३	... ६५
नायकभेदाः, [४८]	... ३	... ७५
नायकलक्षणम्	... ३	... ६४
नायिकात्रैविध्यकथनम्	... ३	... ९६
नायिकाभेदाः [३८४]	... ३	... १२२
नायिकानामलङ्काराः	... ३	... १२५
निदर्शना, अलम्	... १०	... ६९९
निर्वहणाङ्गभेदास्तल्लक्षणानि	... ६	... ३९१ – ४०५
निश्चयालङ्कारः	... १०	... ६८५
निसृष्टार्थदूतलक्षणम्	... ३	... ८७

प

पताकास्थानलक्षणतद्भेदाः	... ६	... २९९ – ३०४
पटलक्षणम्	... २	... ९
पद्यमयकाव्यनियमाः	... ६	... ५५८ – ५६५
परस्त्रीभेदौ	... ३	... १०८
परिकरः, अलम्	... १०	... ७०४
परिणामलक्षणं तद्भेदौ च	... ६	... ७७९
परिवृत्तिः, अलम्	... १०	... ७३४
परिसंख्या अलम्	... १०	... ७३५
परोढा	... ३	... १०९
पर्यायः, अलम्,	... १०	... ७३३
पर्यायोक्तं, अलम्	... १०	... ७०८
पीठमर्द्दनामा नायकसहायः	... ३	... ७६८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रकरणम्	परिच्छेदसंख्या।	कारिकासंख्या।
पीठमर्द्दादीनामुत्तमत्वकथनम्	... ३	... ४
पुनरुक्त्यवभासलक्षणम्	... १०	... ६३२
प्रकरणनामकदृश्यलक्षणभेदाः	... ६	... ५११ – १२
प्रकरणिकालक्षणम्	... ६	... ५५४
प्रगल्भाधीरालक्षणं, अलम्	... ३	... १०४
प्रगल्भालक्षणम्	... ३	... १०१
प्रतिनायकः	... ३	... १५९
प्रतिमुखाङ्गानि, तद्भेदास्तल्लक्षणानि च	... ६	... ३५१ – ३६४
प्रतिवस्तूपमा, अलम्	... १०	... ६९७
प्रतीपः, अलम्	... १०	... ७४१ – ४२
प्रसादगुणः	... ८	... ६११
प्रहसनं, तन्नियमाश्च	... ६	... ५३३ – ५३८
प्रहेलिकाया अलङ्कारत्वनिराकरणम्	... १०	... ६४६
प्रस्थानं, उपरूपकाख्यं दृश्यकाव्यम्	... ६	... ५४४
प्रागल्भ्यं, नायिकालङ्कारः	... ३	... १३३
प्रेङ्खणं, उपरूपकभेदः	... ६	... ५४७
प्रोषितभर्त्रकालक्षणम्	... ३	... ११८

फ

फलार्थारब्धकार्यावस्थाभेदतद्गतलक्षणानि च	... ६	... ३२४ – ३२९

भ

भाणलक्षणकथनम्	... ६	... ५१२
भाणिकालक्षणम्	... ६	... ५५६
भारतीवृत्तिः	... ६	... २८५
भावः, नायिकालङ्कारः	... ३	... १२६
भाविकं, अलम्	... १०	... ७५१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रकरणम्	परिच्छेदसंख्या।	कारिकासंख्या।
भाषासमः, अलम्	... १०	... ६४२
भ्रान्तिमान्, अलम्	... १०	... ६८१

म

मदः, नायिकालङ्कारः	... ३	... १४५
मध्याधीरादीनां लक्षणम्	... ३	... १०३
मध्याप्रगल्भाभेदान्तराणि	... ३	... १०२
मध्यालक्षणम्	... ३	... १००
महानाटकलक्षणम्	... ६	... ५१०
मालादीपकं, अलम्	... १०	... ७२९
महावाक्यम्	... २	... ७
माधुर्यलक्षणम्	... ३	... ९२–१३२
माधुर्यं, गुणभेदः	... ८	... ६०६
मितार्थसन्दर्भहारकौ दूतौ	... ३	... ८८
मुग्धालक्षणम्	... ३	... १५४
मुग्धाकन्यकयोरनुरागेङ्गितानि	... ३	... ९९
मोट्टायितं, नायिकालङ्कारः	... ३	... १४१
मौग्धंग्र, नायिकालङ्कारः	... ३	... १४८

य

यमकलक्षणम्	... १०	... ६४०

र

रसगतदोषाः	... ७	... ५७७
रसनिर्वचनम्	... ३	... ३२
रसभावाभासौ	... ३	... २४७
रसभेदतल्लक्षणतदवान्तरभेदाः सोदाहरणाः	... ३	... २०९–२३८
रसस्य स्वप्रकाशत्वाखण्डत्वसिद्धिः	... ३	... ६०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रकरणम्	परिच्छेदसंख्या।	कारिकासंख्या।
रसस्यानुकार्यगतत्वनिरासः	...३	...५९
रसस्यालौकिकत्वसहृदयसंवेदकत्वकथनम्	...३	...५६
रसस्वरूपतदास्वादप्रकारौ	..१	...३३
रसानां परस्परविरोधः	...३	...४२
रसास्वादे विभावादीनामेकाकारता	...३	...४६
रसोद्बोधे विभावादीनां कारणत्वकथनम्	...३	...४५
रासकलक्षणम्	...६	...५४८
रूपकनामकदृश्यकाव्यभेदाः	...६	...२३५
रूपकालङ्कारस्वरूपभेदलक्षणानि	...१०	...६६९–६७८

ल

लक्षणभेदाः	...२	...२१
लक्षणलक्षणा	...२	...१५
लक्षणाश्रया व्यञ्जना	...२	...२६
लक्षणावृत्तिकथनम्	...२	...१३
लक्षणा सारोपाध्यवसाना	...२	...१७
ललितं, नायिकालङ्कारः	...३	...१४४
लाटानुप्रासः, अलम्	...१०	...६३८
लास्याङ्गभेदास्तल्लक्षणानि च	...६	...५०४–९
लीला, नायिकालम्	...३	...१३६

व

वक्रोक्तिः, अलम्	...१०	...६४१
वत्सलरसः	...३	...२४१
वाक्यस्वरूपम्	...२	...६
वासकसज्जालक्षणम्	...३	...१२०
विकल्पालङ्कारः	...१०	...७३८
विकृतं, नायिकालङ्कारम्	...३	...१४६
विक्षेपः	...३	...१४९
विचित्रं, अलम्	...१०	...७२२
विच्छित्तिः, नायिकालम्	...३	...१३८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रकरणम्	परिच्छेदसंख्या।	कारिकासंख्या।
विटलक्षणम्	...३	...७८
विटविदूषकयोर्मध्यता	...३	...८५
विदूषकलक्षणम्	...३	...७९
विध्याभासः	...१०	...७१५
विनोक्तिः अलम्	...१०	...७०२
विप्रलब्धालक्षणम्	...३	...११८
विभावकथनं तद्भेदौ च,	...३	...६१ – ६२
विभावना तद्भेदौ च अलम्	...१०	...७१६
विभ्रमः, नायिकालम्	...३	...१४३
विमर्शाङ्गभेदास्तल्लक्षणानि च	...६	...३७८ – ३९
विरहोत्कण्ठितालक्षणम्	...३	...१२१
विरोधाङ्कारः सभेदः	...१०	...७१८
विलासलक्षणम्	...३	...९१ – १३७
विलासिकालक्षणम्	...६	...५५२
विव्वोकः, नायिकालम्	...३	...१३९
विशेषस्तद्भेदाश्च, अलम्	...१०	...७२५
विशेषोक्तिः, अलम्	...१०	...७१७
विषमः, अलम्	...१०	...७२०
वीथीलक्षणम्	...६	...२८६ – ५१
वीथ्यङ्गभेदास्तल्लक्षणानि च	...६	...५२१ – ५३
वृत्त्यनुप्रासः, अलम्	...१०	...६३५
वृत्तयस्तद्विनियोगाश्च	...६	...४१०
व्यञ्जनाद्वैविध्यकथनम्	...२	...२४
व्यञ्जनावृत्तिः	...२	...२३
व्यञ्जनस्थानीया तात्पर्याख्या वृत्तिः	...२	...३१
व्यञ्जनास्वीकारः	...५	...२६७ – २७
व्यतिरेकस्तद्भेदाश्च, अलम्	...१०	...७००
व्यभिचारिभावलक्षणभेदानामानि	...३	...१६८ – २०
व्याघातः, अलम्	...१०	...७२६ – २७
व्याजोक्तिः, अलम्	...१०	...७४९
व्याजस्तुतिलक्षणभेदौ अलम्	...१०	...७०७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रकरणम्	परिच्छेदसंख्या।	कारिकासंख्या।
व्यायोगलक्षणम्	...६	...५१४

श

शठनायकः	...३	...७४
शब्दार्थव्यञ्जनयोः परस्परं सह-कार्य्यसहकारकभावकथनम्	...२	..२९
शिल्पकलक्षणम्	...६	...५५१
शृङ्गारसहायाः	...३	...७७
शोभालक्षणम्	...३	...९०–१२९
श्रव्यकाव्यभेदौ	...६	...५५७
श्रीगदितम् उपरूपकभेदः	...६	...५५०
श्रुत्यनुप्रासः	...१०	...६३६
श्लेषलक्षणभेदाः	...१०	...६४३–६४४
श्लेषालङ्कारः	...१०	...७०५

स

संलापकम् उपरूपकभेदः	...६	...५४९
संसृष्टिः, अलम्	...१०	...७५६
सकलनायिकानामनुरागेङ्गितानि	...३	...१५५
सट्टकस्वरूपम्	...६	...५४२
समं, अलम्	...१०	...७२१
समवकारलक्षणम्	...६	...५१५
समाधिः, अलम्	...१०	...७४०
समुच्चयालङ्कारः	...१०	...७३९
सहोक्तिः, अलम्	...१०	...७०१
सम्यङ्ग्यानि मुखगतानि तल्लक्षणानि च	...६	...३३८–३५०
सात्त्वतीवृत्तिस्तद्विशेषास्तल्लक्षणानि च	...६	...४१६–४१९
सात्त्विकभावास्तल्लक्षणानि	...३	...१६६–१६७
समासोक्तिः, अलम्	...१०	...७०३
सारः, अलम्	...१०	...७३१
सङ्करः अलम्	...१०	...७५७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रकरणम्	परिच्छेदसंख्या ।	कारिकासंख्या
सङ्केतग्रहस्थलकथनम्	...३	...१२
सामान्या वा साधारणी स्त्रील० तद्भेदौ च	...७	...१११
समान्यालङ्कारः	...१०	...७४५
सूक्ष्मालङ्कारः	...१०	...७४८
स्थायिभावलक्षणभेदतत्तन्नामानि	...३	...२०५-१
स्मरणालङ्कारः	...१०	...६६८
स्वभावोक्तिः, च्छलम्	...१०	...७५०
स्वस्त्रियस्त्रैविध्यकथनम्	...३	...९८
स्वस्त्रीलक्षणम्	...३	...९७
स्वस्त्रीभेदाः (१३)	...३	...१०८
स्वाधीनभर्तृकालक्षणम्	...३	...११३

ह

हस्तीशलक्षणम्	...६	...५५५
हसितं, नायिकालम्	...३	...१५१
हावः, नायिकालम्	...३	...१२७
हेला, नायिकालम्	...३	...१२८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ओ. आ. नं. नं० ४६८४
८६३(क)

साहित्यदर्पणे प्रथमपरिच्छेदः ॥

ओं नमो गणेशाय ॥

अवतरणिका ॥

ग्रन्थारम्भे निर्विघ्नेन प्रारीप्सितपरिसमाप्तिकामो वाङ्मयाधिकृततया वाग्देवतायाः साम्मुख्यमाधत्ते ॥

मङ्गलाचरणम् ॥

१, शरदिन्दुसुन्दररुचिश्चेतसि सा मे गिरां देवी।
अपहृत्य तमःसन्ततमर्थानखिलान् प्रकाशयतु ॥

अस्य ग्रन्थस्य काव्याङ्गतया काव्यफलैरेव फलवत्त्वमिति ॥

काव्यफलान्याह ।

२, चतुर्वर्गफलप्राप्तिः सुखादल्पधियामपि ।
काव्यादेव यतस्तेन तत्स्वरूपं निरूप्यते ॥

चतुर्वर्गफलप्राप्तिर्हि काव्यतो रामादिवत् प्रवर्त्तितव्यं न रावणादिवदित्यादिकृत्याकृत्यप्रवृत्तिनिवृत्त्युपदेशद्वारेण सुप्रतीतैव। उक्तञ्च ।

"धर्म्मार्थकाममोक्षेषु वैचक्षण्यं कलासु च ।
करोति कीर्त्तिं प्रीतिञ्च साधुकाव्यनिषेवणमिति" ।

किञ्च । काव्याङ्गत्वप्राप्तिर्भगवन्नारायणचरणारविन्दस्तवादिना । एकः शब्दः सुप्रयुक्तः सम्यग्ज्ञातः स्वर्गे लोके

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

च कामधुग् भवति इत्यादिवेदवाक्येभ्यश्च सुप्रसिद्धैव। अर्थप्राप्तिश्च प्रत्यक्षसिद्धा। कामप्राप्तिश्चार्थद्वारैव। मोक्षप्राप्तिश्चैतज्जन्यधर्म्मफलाननुसन्धानात्। मोक्षोपयोगिवाक्ये व्युत्पत्त्याधायकत्वाच्च। चतुर्व्वर्गप्राप्तिर्हि वेदशास्त्रेभ्यो नीरसतया दुःखादेव परिणतबुद्धीनामेव जायते। परमानन्दसन्दोहजनकतया सुखादेव सुकुमारबुद्धीनामपि पुनः काव्यादेव॥ ननु तर्हि परिणतबुद्धिभिः सत्सु वेदशास्त्रेषु काव्येषु किमिति यत्नः करणीय इत्यपि न वक्तव्यम्। कटुकौषधोपशमनीयस्य रोगस्य सितशर्करोपशमनीयत्वे कस्य वा रोगिणः सितशर्कराप्रवृत्तिः साधीयसी न स्यात्॥ किञ्च। काव्यस्योपादेयत्वमाग्नेयपुराणेऽप्युक्तम्।

"नरत्वं दुर्लभं लोके विद्या तत्र सुदुर्ल्लभा।
कवित्वं दुर्ल्लभं तत्र शक्तिस्तत्र सुदुर्लभेति"॥

त्रिवर्गसाधनं नाट्यमिति च विष्णुपुराणे।

"काव्यालापाश्च ये केचिद्गीतकान्यखिलानि च।
शब्दमूर्त्तिधरस्यैते विष्णोरंशा महात्मन इति"॥

तेन हेतुना तस्य काव्यस्य स्वरूपं निरूप्यते। एतेनाभिधेयञ्च प्रदर्शितम्॥

तत् किंस्वरूपं तावत्काव्यमित्यपेक्षायां कश्चित् "तद्दोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापीति" एतच्चिन्त्यम्। तथाहि यदि दोषरहितस्यैव काव्यत्वाङ्गीकारस्तदा।

"न्यक्कारो ह्ययमेव मे यदरयस्तत्राप्यसौ तापसः
सोऽप्यत्रैव निहन्ति राक्षसकुलं जीवत्यहो रावणः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धिक् धिक् शक्रजितं प्रबोधितवता किं कुम्भकर्णेन वा
स्वर्गग्रामटिकाविलुण्ठनपटोच्छूनैः किमेभिर्भुजैः" ॥

अस्य श्लोकस्य विधेयाविमर्षदोषदुष्टतया काव्यत्वं न स्यात् प्रत्युत ध्वनित्वेनोत्तमकाव्यताऽस्याङ्गीकृता तस्मादव्याप्तिर्लक्षणदोषः ॥ ननु कश्चिदेवांशोऽत्र दुष्टो न पुनः सर्वोऽपीति चेत् तर्हि यत्रांशे दोषः सोऽकाव्यत्वप्रयोजको यत्र ध्वनिः स उत्तमकाव्यत्वप्रयोजक इत्यंशाभ्यामुभयत आक्षिप्यमाणं काव्यमकाव्यं वा किमपि न स्यात् ॥ न च किञ्चिदेवांशं काव्यस्य दूषयन्तः श्रुतिदुष्टादयो दोषाः किं तर्हि सर्वमेव काव्यम् । तथाहि । काव्यात्मभूतस्य रसस्यानपकर्षकत्वे तेषां दोषत्वमपि नाङ्गीक्रियते । अन्यथा नित्यदोषानित्यदोषत्वव्यवस्थापि न स्यात् ॥ यदुक्तं ध्वनिकृता ।

"श्रुतिदुष्टादयो दोषा अनित्या ये च दर्शिताः ।
ध्वन्यात्मन्येव शृङ्गारे ते हेया इत्युदाहृताः" ॥

किञ्चैवं काव्यं प्रविरलविषयं निर्विषयं वा स्यात् । सर्वथा निर्दोषस्यैकान्तमसम्भवात् । ननु ईषदर्थे नञः प्रयोग इति चेत् तर्हि ईषद्दोषौ शब्दार्थौ काव्यमित्युक्तेर्निर्दोषयोः काव्यत्वं न स्यात् । सति सम्भवे ईषद्दोषाविति चेद् एतदपि काव्यलक्षणेऽवाच्यम् । रत्नादिलक्षणे कीटानुवेधादिपरिहारवत् । न हि कीटानुवेधादयो रत्नस्य रत्नत्वं व्याहन्तुमीशाः किन्तु उपादेयतारतम्यमेव कर्त्तुं तद्वदत्र श्रुतिदुष्टादयोऽपि काव्यस्य ॥ उक्तञ्च ।

"कीटानुविद्धरत्नादिसाधारण्येन काव्यता ।
दुष्टेष्वपि मता यत्र रसाद्यनुगमः स्फुटः" ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

किञ्च । शब्दार्थयोः सगुणत्वविशेषणमनुपपन्नम् । गुणानां-रसैकधर्म्मत्वस्य "ये रसस्याङ्गिनो धर्म्माः शौर्य्यादय इवात्मन" इत्यादिना तेनैव प्रतिपादितत्वात् ॥ रसाभिव्यञ्जकत्वेन उपचारत उपपद्यत इति चेत् तथाप्ययुक्तम् । तथाहि । तयोः काव्यस्वरूपत्वेनाभिमतयोः शब्दार्थयो रसोऽस्ति न वा । नास्ति चेद् गुणवत्त्वमपि नास्ति । गुणानां तदन्वयव्यतिरेकानुविधायित्वात् । अस्ति चेत् कथं नोक्तं रसवन्ताविति विशेषणम् । गुणवत्त्वान्यथानुपपत्त्याएतल्लभ्यत इति चेत् तर्हि सरसावित्येव वक्तुं युक्तं न सगुणाविति । न हि प्राणिमन्तो देशा इति वक्तव्ये "शौर्य्यादिमन्तो देशा" इति केनाप्युच्यते ॥ ननु शब्दार्थौ सगुणावित्यनेन गुणाभिव्यञ्जकौ शब्दार्थौ काव्ये प्रयोज्यावित्यभिप्राय इति चेत् । न । गुणाभिव्यञ्जकशब्दार्थवत्त्वस्यापि काव्ये उत्कर्षमात्राधायकत्वं न तु स्वरूपाधायकत्वम् । उक्तं हि "काव्यस्य शब्दार्थौ शरीरं रसादिश्चात्मा गुणाः शौर्य्यादिवद् दोषाः काणत्वादिवद् रीतयोऽवयवसंस्थानविशेषवद् अलङ्काराः । कटककुण्डलादिवदिति" । एतेन "अनलङ्कृती पुनः क्वापीति" यदुक्तं तदपि परास्तम् । अस्य ह्यर्थः "सर्व्वत्र सालङ्कारौ क्वचित्त्वस्फुटालङ्कारावपि शब्दार्थौ काव्यमिति" । तत्र सालङ्कारशब्दार्थयोरपि काव्ये उत्कर्षमात्राधायकत्वात् । एतेन "वक्रोक्तिः काव्यजीवितमिति" वक्रोक्तिजीवितकारोक्तमपि परास्तम् । वक्रोक्तेरलङ्काररूपत्वात् । यच्च क्वचिदस्फुटालङ्कारत्वे उदाहृतम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

"यः कौमारहरः स एव हि वरस्ता एव चैत्रक्षपास्
ते चोन्मीलितमालतीसुरभयः प्रौढाः कदम्बानिलाः ।
सा चैवास्मि तथापि तत्र सुरतव्यापारलीलाविधौ
रेवारोधसि वेतसीतरुतले चेतः समुत्कण्ठते" ॥

एतच्चिन्त्यम् । अत्र हि विभावनाविशेषोक्तिमूलस्य सन्देहसङ्करालङ्कारस्य स्फुटत्वम् । एतेन ।

"अदोषं गुणवत् काव्यमलङ्कारैरलङ्कृतम् ।
रसान्वितं कविः कुर्व्वन् कीर्त्तिं प्रीतिञ्च विन्दति" ॥

इत्यादीनामपि काव्यलक्षणत्वमपास्तम् ॥ यत्तु ध्वनिकारेणोक्तं "काव्यस्यात्मा ध्वनिरिति" तत् किं वस्त्वलङ्काररसादिलक्षणस्त्विरूपो ध्वनिः काव्यस्यात्मा उत रसादिरूपमात्रो वा । नाद्यः । प्रहेलिकादावतिव्याप्तेः । द्वितीयश्चेदोमिति ब्रुमः ॥ ननु यदि रसादिमात्ररूप एव ध्वनिः काव्यस्यात्मा तदा ।

"अत्ता एत्थ निमज्जइ एत्थ अहं दिअसअं पलोएहि ।
मा पहिअ रत्तिअन्धअ सेज्जाइ मह निमज्जहिसि" * ॥

इत्यादौ वस्तुमात्रव्यङ्ग्यत्वे कथं काव्यव्यवहार इति चेद् अत्रापि रसाभासवत्तयैव ब्रूमः । अन्यथा "देवदत्तो ग्रामं यातीति" वाक्ये तद्भृत्यस्य तदनुसरणरूपव्यङ्ग्यावगतेरपि काव्यत्वं स्यात् । अस्त्विति चेत् । न । रसवत एव काव्यत्वाङ्गीकारात् । काव्यस्य प्रयोजनं हि रसास्वादसुखपिण्डदानद्वारेण । वेदशास्त्रविमुखानां सुकुमारमतीनां

* संस्कृतार्थः । स्वश्रूरत्र निमज्जति अत्राहं दिवस एव प्रलोकय । मा पथिक रात्र्यम्बक शय्यायां मम निमंक्ष्यसि ॥ टीका ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

राजपुत्रप्रभृतीनां विनेयानां रामादिवत् प्रवर्त्तितव्यं न रावणादिवदित्यादिकृत्याकृत्यप्रवृत्तिनिवृत्त्युपदेश इति चिरन्तनैरप्युक्तत्वात्॥ तथा चाग्नेयपुराणेऽप्युक्तम्।

"वाग्वैदग्ध्यप्रधानेऽपि रस एवात्र जीवितमिति"।

व्यक्तिविवेककारेणाप्युक्तं "काव्यस्यात्मनि अङ्गिनि रसादिरूपे न कस्यचिद्विमतिरिति"। ध्वनिकारेणाप्युक्तम्। "न हि कवेरितिवृत्तमात्रनिर्वाहेणात्मलाभ इतिहासादेरेव तत्सिद्धेरित्यादि"॥ ननु तर्हि प्रबन्धान्तर्वर्त्तिनां केषामपि नीरसानां पद्यानां काव्यत्वं न स्यादिति चेत्। न। रसवत् पद्यान्तर्गतनीरसपदानामिव पद्यरसे प्रबन्धरसेनैव तेषां रसवत्ताङ्गीकारात्। यत्तु नीरसेष्वपि गुणाभिव्यञ्जकवर्णसङ्गावाद् दोषाभावादलङ्कारसङ्गावाच्च काव्यव्यवहारः स रसादिमत्काव्यबन्धसाम्याद्गौण एव। यत्तु वामनेनोक्तं "रीतिरात्मा काव्यस्येति" तन्न रीतेः सङ्घट्टनाविशेषत्वात्। सङ्घट्टनायाश्च अवयवसंस्थानरूपत्वात्। आत्मनश्च तद्भिन्नत्वात्। यच्च ध्वनिकारेणोक्तम्।

"अर्थः सहृदयश्लाघ्यः काव्यात्मा यो व्यवस्थितः।
वाच्यप्रतीयमानाख्यौ तस्य भेदावुभौ स्मृताविति"॥

तत्र वाच्यस्यात्मत्वं "काव्यस्यात्मा ध्वनिरिति" स्ववचनविरोधादेवापास्तम्॥ तत् किं पुनः काव्यमित्युच्यते।

३, वाक्यं रसात्मकं काव्यं

रसस्वरूपंनिरूपयिष्यामः। रस एवात्मा साररूपतया जीवनाधायकोऽस्य तेन विना तस्य काव्यत्वानङ्गीकारात्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रस्यत इति रस इति व्युत्पत्तियोगाद् भावतदाभासादयो-ऽपि गृह्यन्ते ॥

तत्र रसो यथा ।

"शून्यं वासगृहं विलोक्य शयनादुत्थाय किञ्चिच्छनै
र्निद्राव्याजमुपागतस्य सुचिरं निर्व्वर्ण्य प्रत्युर्मुखम् ।
विस्रब्धं परिचुम्ब्य जातपुलकामालोक्य गण्डस्थलीम्
लज्जानम्रमुखी प्रियेण हसता बाला चिरं चुम्बिता"॥

अत्र हि सम्भोगशृङ्गाराख्यो रसः ॥ भावो यथा महापात्रराघवानन्दसान्धिविग्रहिकाणाम् ।

"यस्यालीयत शल्कसीम्नि जलधिः पृष्ठे जगन्मण्डलं
दंष्ट्रायां धरणी नखे दितिसुताधीशः पदे रोदसी ।
क्रोधे क्षत्रगणः शरे दशमुखः पाणौ प्रलम्बासुरो
ध्याने विश्वमसावधार्म्मिककुलं कस्मैचिदस्मै नमः" ॥

अत्र भगवद्विषया रतिर्भावः । रसाभासो यथा ।

"मधुद्विरेफः कुसुमैकपात्रे पपौ प्रियां स्वामनुवर्त्तमानः ।
शृङ्गेण च स्पर्शनिमीलिताक्षीं मृगीमकण्डूयत कृष्णसारः"

अत्र हि सम्भोगशृङ्गारस्य तिर्य्यग्विषयत्वाद्रसाभासः । एवमन्यत् ॥ दोषाः पुनः काव्ये किंस्वरूपा इत्युच्यते ।

४, दोषास्तस्यापकर्षकाः ।

श्रुतिदुष्टापुष्टार्थत्वादयः काणत्वखञ्जत्वादय इव देहद्वारेणैव शब्दार्थद्वारेण व्यभिचारिभावादेः स्वशब्दवाच्यत्वादयो मूर्खतादय इव साक्षात् काव्यस्यात्मभूतं रसमपक-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्षयन्तः काव्यस्यापकर्षका उच्यन्ते । एषां विशेषोदाहरणानि वक्ष्यामः ॥ गुणादयः किं स्वरूपा इत्युच्यते ।

५, उत्कर्षहेतवः प्रोक्ता गुणालङ्काररीतयः ॥

गुणाः शौर्यादिवत् । अलङ्काराः कटककुण्डलादिवत् । रीतयोऽवयवसंस्थानविशेषवत् । देहद्वारेणेव शब्दार्थद्वारेण तमेव काव्यस्यात्मभूतरसमुत्कर्षयन्तः काव्यस्योत्कर्षका उच्यन्ते । इह यद्यपि गुणानां रसधर्मत्वं तथापि गुणशब्दोऽत्र गुणाभिव्यञ्जकशब्दार्थयोरुपचर्य्यते । अतश्च गुणाभिव्यञ्जकाः शब्दा रसस्योत्कर्षका इत्युक्तं भवतीति प्रागेवोक्तम् । एषामपि विशेषोदाहरणानि वक्ष्यामः ॥ * ॥

इति श्रीमन्नारायणचरणारविन्दमधुव्रतसाहित्यार्णवकर्णधारध्वनिप्रस्थापनपरमाचार्य्यकविसूक्तिरत्नाकराष्टादशभाषावारविलासिनीभुजङ्गसान्धिविग्रहिकमहापात्रश्रीविश्वनाथकविराजकृतौ साहित्यदर्पणे काव्यस्वरूपनिरूपणो नाम प्रथमः परिच्छेदः ॥ * ॥

वाक्यस्वरूपमाह ।

६, वाक्यं स्याद्योग्यताकाङ्क्षासत्तियुक्तः पदोच्चयः ॥

योग्यता पदार्थानां परस्परसम्बन्धे बाधाभावः । पदोच्चयस्यैतदभावेऽपि वाक्यत्वे वह्निना सिञ्चतीत्यपि वाक्यं स्यात् । आकाङ्क्षा प्रतीतिपर्य्यवसानविरहः । स च श्रोतुर्जिज्ञासास्वरूपः । निराकाङ्क्षस्य वाक्यत्वे गौरश्वः पुरुषो हस्तीत्यादीनामपि वाक्यत्वं स्यात् । आसत्तिर्बुद्धिवि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

च्छेदेऽपि वाक्यत्वे इदानीमुच्चरितस्य देवदत्तशब्दस्य दिनान्तरोच्चारितेन गच्छतीतिपदेन सङ्गतिः स्यात् । अत्राकाङ्क्षायोग्यतयोरालार्थधर्म्मत्वेऽपि पदोच्चयधर्म्मत्वमुपचारात् योग्यताकाङ्क्षासत्तियुक्त एव ॥

७, वाक्योच्चयो महावाक्यमित्थं वाक्यं द्विधा मतम् ॥ ४ ॥

इत्थमिति वाक्यत्वेन महावाक्यत्वेन च ॥ उक्तञ्च ।

"स्वार्थबोधसमाप्तानामङ्गाङ्गित्वव्यपेक्षया ।
वाक्यानामेकवाक्यत्वं पुनः संहत्य जायत इति" ॥

तत्र वाक्यं यथा । "शून्यं वासगृहमित्यादि" ॥ महावाक्यं यथा । रामायणमहाभारतरघुवंशादि ॥४॥

पदोच्चयो वाक्यमित्युक्तं तत् किं पदलक्षणमित्यत आह ।

८, वर्णाः पदं प्रयोगार्हानन्वितैकार्थबोधकाः ।

यथा घटः । प्रयोगार्ह इति प्रातिपदिकस्य व्यवच्छेदः । अनन्वितेति वाक्यमहावाक्ययोः । एकेति साकाङ्क्षानेकपदवाक्यानाम् । अर्थबोधका इति कचटतपानाम् । वर्णा इति वज्रवचनमविवक्षितम् ॥५॥

९, अर्थो वाच्यश्च लक्ष्यश्च व्यङ्ग्यश्चेति त्रिधा मतः ॥ ५ ॥

तत्र एषां स्वरूपमाह ।

१०, वाच्योऽर्थोऽभिधया बोध्यो लक्ष्यो लक्षणया मतः
व्यङ्ग्यो व्यञ्जनया ताः स्युस्तिस्रः शब्दस्य शक्तयः ॥६॥

ता अभिधाद्याः ॥६॥

११, तत्र सङ्केतितार्थस्य बोधनादग्रिमाऽभिधा ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उत्तमशब्देन मध्यमशब्दमुद्दिश्य "गामानय" इत्युक्ते तं गवानयनमर्थमुपलभ्य बालोऽस्य वाक्यस्य "सास्नादिमत्पिण्डानयनमर्थः" इति प्रथमं प्रतिपद्यते। अनन्तरञ्च "गां बधान अश्वमानय" इत्यादावावापोद्वाराभ्यां गोशब्दस्य "सास्नादिमानर्थः" आनयनशब्दस्य चाहरणमर्थः" इति सङ्केतमवधारयति। क्वचिच्च प्रसिद्धपदसमभिव्याहारात्। यथा।

"इह प्रभिन्नकमलोदरे मधूनि मधुकरः पिबति" इत्यत्र। क्वचिदाप्तोपदेशात्। यथा "अयमश्वशब्दवाच्यः" इत्यत्र। तच्च सङ्केतितमर्थं बोधयन्ती शब्दस्य शक्त्यन्तरानन्तरिता शक्तिरभिधा नाम।

१२, सङ्केतो गृह्यते जातौ गुणद्रव्यक्रियासु च॥७॥

जातिर्गोपिण्डादिषु गोत्वादिका। गुणो विशेषाधानहेतुः सिद्धो वस्तुधर्म्मः। शुक्लादयो हि गवादिकं सजातीयेभ्यः कृष्णगवादिभ्यो व्यावर्त्तयन्ति। द्रव्यशब्दा एकव्यक्तिवाचिनो हरिहरडित्थडवित्थादयः। क्रियाः साध्यरूपा वस्तुधर्म्माः पाकादयः। एष हि अधिश्रयणादिः श्रयणाद्यन्तादिपूर्व्वापरीभूतव्यापारकलापः पाकादिशब्दवाच्यः। एष्वेव हि व्यक्तिरूपा धिषु सङ्केतो गृह्यते न व्यक्तौ आनन्त्यव्यभिचारदोषापातात्॥७॥

अथ लक्षणा।

१३, मुख्यार्थबाधे तद्युक्तो ययाऽन्योऽर्थः प्रतीयते। रूढेः प्रयोजनाद्वासौ लक्षणा शक्तिरर्पिता॥८॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

"कलिङ्गः साहसिकः" इत्यादौ कलिङ्गादिशब्दो देशविशेषादिरूपे स्वार्थेऽसम्भवन् यया शब्दस्य शक्त्या स्वसंयुक्तान् पुरुषादीन् प्रत्याययति, यया च "गङ्गायां घोषः" इत्यादौ गङ्गादिशब्दो जलप्रवाहादिरूपार्थवाचकत्वात् प्रकृतेऽसम्भवन् स्वस्य सामीप्यादिसम्बन्धसम्बन्धिनं तटादिं बोधयति सा शब्दस्यार्पिता स्वाभाविकेतरा ईश्वरानुद्भाविता वा शक्तिर्लक्षणा नाम। पूर्वत्र हेतू रूढिः प्रसिद्धिरेव । उत्तरत्र "गङ्गातटे घोषः" इति प्रतिपादनादलभ्यस्य शीतत्वपावनत्वातिशयस्य बोधनरूपं प्रयोजनम्। हेतुं विनापि यस्य कस्यचित् सम्बन्धिनो लक्षणेऽतिप्रसङ्गः स्यादित्यत उक्तम्। "रूढेःप्रयोजनाद्वापीति"॥ केचित् तु "कर्म्मणि कुशलः" इति रूढावुदाहरन्ति। तेषामयमभिप्रायः। "कुशं लाति" इति व्युत्पत्तिलभ्यः कुशग्राहिरूपो मुख्योऽर्थः प्रकृतेऽसम्भवन् विवेचकत्वसाधर्म्यप्रसम्बन्धसम्बन्धिनं दक्षरूपमर्थं बोधयति। तदन्येन मन्यन्ते । कुशग्राहिरूपार्थस्य व्युत्पत्तिलभ्यत्वेऽपि दक्षरूपस्यैव मुख्यार्थत्वात्। अन्यद्धि शब्दानां व्युत्पत्तिनिमित्तमन्यच्च प्रवृत्तिनिमित्तम्। व्युत्पत्तिलभ्यस्य मुख्यार्थत्वे "गौः शेते" इत्यत्रापि लक्षणा स्यात्। "गमेर्डोः" इति गमधातोर्डोप्रत्ययेन व्युत्पादितस्य गोशब्दस्य शयनकालेऽपि प्रयोगात्॥ ८॥

तद्भेदानाह ।

१४, मुख्यार्थस्येतराक्षेपो वाक्यार्थेऽन्वयसिद्धये ।
स्यादात्मनोऽप्युपादानाद्देशोपादानलक्षणा ॥९॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रूढावुपादानलक्षणा यथा "श्वेतो धावति"। प्रयोजने यथा "कुन्ताः प्रविशन्ति"। अनयोर्हि श्वेतादिभिः कुन्तादिभिश्च अचेतनया केवलैर्धावनप्रवेशनक्रिययोः कर्त्तृतयाऽन्वयमलभमानैरेतत्सिद्धये आत्मसम्बन्धिनोऽश्वादयः पुरुषादयश्चाक्षिप्यन्ते। पूर्व्वत्र प्रयोजनाभावाद्रूढिः। उत्तरत्र कुन्तादीनामतिगहनत्वं प्रयोजनम्। अत्र च मुख्यार्थस्यात्मनोऽप्युपादानम्। लक्षणलक्षणायान्तु परस्यैवोपलक्षणमित्यनयोर्भेदः। इयमेव "अजहत्स्वार्था" इत्युच्यते ॥९॥

१५, अर्पणं स्वस्य वाक्यार्थे परस्यान्वयसिद्धये।
उपलक्षणहेतुत्वादेषा लक्षणलक्षणा ॥१०॥

रूढिप्रयोजनयोर्लक्षणलक्षणा यथा। "कलिङ्गः साहसिकः" "गङ्गायां घोषः" इति च। अनयोर्हि पुरुषतटयोर्वाक्यार्थेऽन्वयसिद्धये कलिङ्ग गङ्गाशब्दावात्मानमर्पयतः॥ यथा वा।

"उपकृतं बहु तत्र किमुच्यते सुजनता प्रथिता भवता परम्।
विदधदीदृशमेव सदा सखे सुखितमास्स्व ततः शरदां शतम्॥

अत्रापकारादीनां वाक्यार्थेऽन्वयसिद्धय उपकृतादयः शब्दा आत्मानमर्पयन्ति। अत्रापकारिणंप्रत्युपकारादिप्रतिपादनान्मुख्यार्थबाधः। वैपरीत्यलक्षणः सम्बन्धः। फलमप्युपकरातिशयः। इयमेव "जहत्स्वार्था" इत्युच्यते॥१०॥

१६, आरोपाध्यवसानाभ्यां प्रत्येकं ता अपि द्विधा।
ताः पूर्व्वोक्ताश्चतुर्भेद लक्षणाः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१७, विषयस्यानिगीर्णस्यान्यतादात्म्यप्रतीतिकृत् ॥११॥

सारोपा स्यान्निगीर्णस्य मता साध्यवसानिका*

रूढौ उपादानलक्षणा सारोपा यथा । "अश्वः श्वेतो धावति" । अत्र हि श्वेतगुणवानश्वोऽनिगीर्णस्वरूपः स्वसमवेतश्वेतगुणतादात्म्येन प्रतीयते ॥ प्रयोजने यथा । "एते कुन्ताः प्रविशन्ति" । अत्र सर्वनाम्ना कुन्तधारिपुरुषनिर्देशात् सारोपात्वम् ॥ रूढौ लक्षणलक्षणा सारोपा यथा । "कलिङ्गःपुरुषो युध्यति" । अत्र पुरुषकलिङ्गयोराधार्याधारसम्बन्धः ॥ प्रयोजने यथा । "आयुर्घृतम्" । अत्र आयुष्कारणमपि घृतं कार्यकारणभावसम्बन्धसम्बन्ध्यायुस्तादात्म्येन प्रतीयते अन्यवैलक्षण्येनाव्यभिचारेणायुष्करत्वं प्रयोजनम् ॥ ११ ॥

यथा वा । राजकीये पुरुषे गच्छति "राजासौ गच्छति" इति । अत्र स्वस्वामिभावलक्षणः सम्बन्धः ॥ यथा वा । अग्रभागेऽवयवे "हस्तोऽयम्" । अत्रावयवावयविभावलक्षणः सम्बन्धः ॥ ब्राह्मणेऽपि "तच्चासौ" । अत्र तात्कर्म्यलक्षणः सम्बन्धः ॥ इन्द्रार्थासु स्थूणासु "अमी इन्द्राः" अत्र तादर्थ्यलक्षणः सम्बन्धः । एवमन्यत्रापि ॥ निगीर्णस्य पुनर्विषयस्यान्यतादात्म्यप्रतीतिकृत् साध्यवसाना । अस्याश्चतुर्षु भेदेषु पूर्वोदाहरणान्येव ॥

---

*विषयस्येति । निरुक्तारोपविषयस्येत्यर्थः । अनिगीर्णस्य इतिप्रयुक्तशब्दप्रतिपादितस्यान्यतादात्म्यप्रतीतिकृत् स्वजन्यपदार्थोपस्थितिद्वारा शक्यतावच्छेदकातिरिक्तधर्मावच्छिन्नस्याभेदप्रतीतिकृद्या सा लक्षणा सारोपा स्यादित्यर्थः ॥ टी० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१८साहश्येतरसम्बन्धाः शुद्धास्ताः सकला अपि ॥१२॥
साहश्यात् तु मता गौण्यस्तेन षोडशभेदिताः।

ताः पूर्व्वोक्ता अष्टभेदा लक्षणाः । साहश्येतरसम्बन्धाः कार्य्यकारणभावादयः । अत्र शुद्धानां पूर्व्वोदाहरणान्येव ॥ रूढावुपादानलक्षणा सारोपा गौणी यथा । "एतानि तैलानि हेमन्ते सुखानि" । अत्र तैलशब्दस्तिलसम्बन्धेहरूपं सुखार्थमुपादायैव सार्षपादिस्नेहेषु वर्त्तते ॥ प्रयोजने यथा । राजकुमारेषु तत्सदृशेषु गच्छत्सु "एते राजकुमारा गच्छन्ति" ॥ रूढावुपादानलक्षणा साध्यवसाना गौणी यथा । "तैलानि हेमन्ते सुखानि" ॥ प्रयोजने यथा । "राजकुमारा गच्छन्ति" ॥ रूढौ लक्षणलक्षणा सारोपा गौणी यथा । "राजा गौडेन्द्रः कण्टकं शोधयति" ॥ प्रयोजने यथा "गौर्व्वाहीकः" ॥ रूढौ लक्षणा साध्यवसाना गौणी यथा । "राजा कण्टकं शोधयति" ॥ प्रयोजने यथा । "गौर्जल्पति" ॥

अत्र केचिदाहुः "गोसहचारिणो गुणा जाड्यमान्द्यादयो लक्ष्यन्ते । ते च गोशब्दस्य वाहीकार्थाभिधाने निमित्तीभवन्ति" । तदयुक्तम् । गोशब्दस्याप्रहीतसङ्केतं वाहीकार्थमभिधातुमसामर्थ्यात् । गोशब्दार्थमात्रबोधनाच्च । अभिधाया विरतत्वाद् विरतायाश्च पुनरुत्थानाभावात् । अन्ये पुनर्गोशब्देन "वाहीकार्थो नाभिधीयते किन्तु स्वार्थसहचारिगुणमात्रात्येन वाहीकार्थगता गुणा एव लक्ष्यन्ते" । तदप्यन्ये न मन्यन्ते । तथा ह्यत

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गोशब्दाद्वाहीकार्थः प्रतीयते न वा। आद्येऽपि गोशब्दादेव वा लक्षिताद्वा गुणात्। अविनाभावद्वारा तत्र न प्रथमः। वाहीकार्थेऽस्यासङ्केतितत्वात्। न द्वितीयः। अविनाभावलभ्यस्यार्थस्य शाब्दान्वये प्रवेशासम्भवात्। शाब्दी ह्याकाङ्क्षा शब्देनैव प्रपूर्य्यते॥ न द्वितीयः। यदि हि गोशब्दाद्वाहीकार्थो न प्रतीयते तदास्य वाहीकस्य सामानाधिकरण्यमसमञ्जसं स्यात्। तस्मादत्र गोशब्दोमुख्यया वृत्त्या वाहीकशब्देन सहान्वयमलभमानोऽज्ञत्वादिसाधर्म्यप्रसम्बन्धाद्वाहीकार्थं लक्षयति। वाहीकस्याज्ञत्वाद्यतिशयबोधनं प्रयोजनम्। इयञ्च गुणयोगाद् "गौणी" इत्युच्यते। पूर्व्वा तु उपचारामिश्रणात् शुद्धा। उपचारो हि नामात्यन्तं विशकलितयोः सादृश्यातिशयमहिम्ना भेदप्रतीतिस्मरणमात्रम्। यथा अग्निमाणवकयोः शुक्लपदयोस्तु नात्यन्तं भेदप्रतीतिः। तस्मादेवमादिषु शुद्धैव लक्षणा॥ १२॥

१९, व्यङ्ग्यस्य गूढागूढत्वाद्
द्विधा स्युः फललक्षणाः॥१३॥

प्रयोजने अष्टभेदा लक्षणा दर्शिताः। प्रयोजनरूपव्यङ्ग्यस्य गूढागूढतया प्रत्येकं द्विधा भूत्वा षोडशभेदाः। तत्र गूढः काव्यार्थभावनापरिपक्वबुद्धिविभवमात्रवेद्यः। यथा। "उपहतं बत तत्रेति"॥ अगूढोऽतिस्पष्टतया सर्व्वजनसंवेद्यः। यथा।

"उपहिष्यति कामिनीनां यौवनमह एव सखि तानि"॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अत्र "उपदिशति" इत्यनेन "आविष्करोति" इतिलक्ष्यते। आविष्कारातिशयश्चाभिधेयवत् स्फुटं प्रतीयते ॥१३॥

२०, धर्म्मि धर्म्मगतत्वेन फलस्य ता अपि द्विधा ॥

एता अनन्तरोक्ताः षोडशभेदा लक्षणाः फलस्य धर्म्मिगतत्वेन धर्म्मगतत्वेन च प्रत्येकं द्विधा भूत्वा द्वात्रिंशद्भेदाः ॥

क्रमेणोदाहरति ।

"स्निग्धश्यामलकान्तिलिप्तवियतो वेल्लद्बलाका घना
वाताः शीकरिणः पयोदसुहृदामानन्दकेकाः कलाः।
कामं सन्तु दृढं कठोरहृदयो रामोऽस्मि सर्व्वं सहे
वैदेही तु कथं भविष्यति हहा हा देवि धीरा भव"॥१॥

अत्रात्यन्तदुःखसहिष्णुरूपे रामे धर्म्मिणि लक्ष्ये तस्यैवातिशयः फलम् ॥ "गङ्गायां घोषः" इत्यत्र तटादिषु लक्ष्येषु शीतत्वपावनत्वादिरूपधर्म्मस्यातिशयः फलम् ॥

२१, तदेवं लक्षणाभेदाश्चत्वारिंशन्मता बुधैः॥१४॥

रूढावष्टौ फलेद्वात्रिंशदिति चत्वारिंशल्लक्षणाभेदाः ॥१४॥ किञ्च ।

२२, पदवाक्यगतत्वेन प्रत्येकं ता अपि द्विधा ।

ता अनन्तरोक्ताः । तत्र पदगतत्वेन यथा । "गङ्गायां घोषः" ॥ वाक्यगतत्वेन यथा ॥ "उपक्रतं बहुतत्रेति" ॥ एवमशीतिप्रकारा लक्षणाः ॥८०॥

अथ व्यञ्जना ।

२३, विरतास्वभिधाद्यासु ययाऽर्थो बोध्यतेऽपरः। ॥१५॥
सा वृत्तिर्व्यञ्जना नाम शब्दस्यार्थादिकस्य च ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शब्दबुद्धिकर्म्मणां विरम्य व्यपाराभाव इति नयेनाभिधालक्षणातात्पर्य्याख्यासु तिसृषु वृत्तिषु स्वं स्वमर्थं बोधयित्वा उपक्षीणासु ययान्योऽर्थो बोध्यते ॥ १५ ॥ सा शब्दस्यार्थस्य प्रकृतिप्रत्ययादेश्च वृत्तिर्व्यञ्जनध्वननगमनप्रत्यायनादिव्यपदेशविषया व्यञ्जना नाम ॥ १ ॥

२४, अभिधालक्षणामूला शब्दस्य व्यञ्जना द्विधा॥
॥ १६ ॥

तत्र अभिधामूलामाह ।

२५, अनेकार्थस्य शब्दस्य संयोगाद्यैर्नियन्त्रिते ।
एकत्रार्थेऽन्यधीहेतुर्व्यञ्जना साभिधाश्रया ॥१७॥

आद्यशब्दाद्विप्रयोगादयः । उक्तं हि ।

"संयोगो विप्रयोगश्च साहचर्य्यं विरोधिता ।
अर्थः प्रकरणं लिङ्गं शब्दस्यान्यस्य सन्निधिः ॥१॥
सामर्थ्यमौचिती देशः कालो व्यक्तिः स्वरादयः ।
शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः" ॥२॥ इति

"सशङ्खचक्रो हरिः" इत्यत्र शङ्खचक्रसंयोगेन हरिशब्दो विष्णुमेवाभिधत्ते । "अशङ्खचक्रो हरिः" इति वियोगेन तमेव। "भीमार्ज्जुनौ"इति अर्ज्जुनः पार्थः। "कर्णार्ज्जुनौ" इति कर्णः सूतपुत्रः। "स्थाणुं वन्दे" इति स्थाणुः शिवः। "सर्व्वं जानाति देवः"इति देवो भगवान् । "कुपितो मकरध्वजः" इति मकरध्वजः कामः । "देवः पुरारिः" इति देवः शिवः । "मधुना मत्तः पिकः" इति मधुर्व्वसन्तः।"पातु वो दयिता मुखम्"इति मुखं साम्मुख्यम् । "विभाति गगने चन्द्रः" इति चन्द्रः शशी । "निशि चिल-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भानुः" इति चित्रभानुर्व्वह्निः । "भाति रथाङ्गम्" इति नमुंसकव्यक्त्या रथाङ्गं चक्रम् । स्वरस्तु वेद एव विशेषप्रतीतिज्ञन् न काव्य इति तस्य विषये नोदाहृतम् । इदञ्च केऽप्यसहमाना आहुः । "स्वरोऽपि काक्वादिरूपः काव्ये विशेषप्रतीतिज्ञदेव उदात्तादिरूपोऽपि मुनेःपाठोक्तदिशा शृङ्गारादिरसविशेषप्रतीतिज्ञदेवेत्येतद्विषय उदाहरणमुचितमेवेति" । तन्न । स्वराः काक्वादय उदात्तादयो वा व्यङ्ग्यरूपमेव विशेषं प्रत्याययन्ति न खलु प्रकृतोक्तमनेकार्थशब्दस्यैकार्थनियन्त्रणरूपं विशेषम् । किञ्च । यदि यत्र क्वचिदनेकार्थशब्दानां प्रकरणादिनियमाभावादनियन्त्रितयोरप्यर्थयोरनुरूपस्वरवशेनैकत्र नियमनं वाच्यं तदा तथाविधस्थले श्लेषानङ्गीकारप्रसङ्गः। न च तथा। अत एवाहुः "श्लेषनिरूपणप्रस्तावे काव्यमार्गे स्वरो न गण्यत इति च नयः" इत्यलमुपजीव्यानां मान्यानां व्याख्यानेषु कटाक्षनिक्षेपेण । आदिशब्दाद् "एतावन्मात्रस्तनी" इत्यादौ हस्तादिचेष्टादिभिः स्तनादीनां कमलकोरकाद्याकारत्वम्। एवमेकस्मिन्नर्थे अभिधया नियन्त्रिते या शब्दस्यान्यार्थबुद्धिहेतुः शक्तिः सा अभिधामूला व्यञ्जना ।। यथा मम तातपादानां महापात्रचतुर्दशभाषाविलासिनीभुजङ्गमहाकवीश्वरश्रीचन्द्रशेखरसान्धिविग्रहिकाणाम् ।

"दुर्गालङ्घितविग्रहो मनसिजं सम्मीलयंस्तेजसा
प्रोद्यद्राजकलो रटद्गीतगरिमा विश्वग्वृतो भोगिभिः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नक्षत्रेशक्षतेक्षणो गिरिगुरौ गाढां रुचिं धारयन्
गामाक्रम्य विभूतिभूषिततनूराजत्युमावल्लभः" ॥१॥

अत्र प्रकरणेनाभिधया उमावल्लभशब्दस्योमानाम्नी महादेवी तद्वल्लभभानुदेवतप्रतिरूपेऽर्थे नियन्त्रिते व्यञ्जनयैव गौरीवल्लभरूपोऽर्थो बोध्यते । एवमन्यत् ॥

लक्षणामूलामाह ।

२६, लक्षणोपाय्यते यस्य कृते तत्तु प्रयोजनम्।
यया प्रत्याय्यते सा स्याद् व्यञ्जना लक्षणाश्रया ॥
॥ १८ ॥

"गङ्गायां घोषः" इत्यादौ जलमयाद्यर्थबोधनादभिधायां विरतायां तटाद्यर्थबोधनाय लक्षणायां विरतायां यया शीतत्वपावनत्वाद्यतिशयादिर्बोध्यते सा लक्षणामूला व्यञ्जना ॥१८॥

एवं शाब्दीं व्यञ्जनामुक्त्वाऽऽर्थीं व्यञ्जनामाह ।

२७, वक्तृबोद्धव्यवाक्यानामन्यसन्निधिवाच्ययोः।
प्रस्तावदेशकालानां काकोश्चेष्टादिकस्य च ॥१९॥
वैशिष्ट्यादन्यमर्थं या बोधयेत् सार्थसम्भवा ।

व्यञ्जनेति सम्बध्यते । तत्र वक्तृवाक्यप्रस्तावदेशकालवैशिष्ट्यं यथा मम ।

"कालो मधुः कुपित एष च पुष्पधन्वा
धीरा वहन्ति रतिखेदहराः समीराः ।
केलीवनीयमपि वञ्जुलकुञ्जमञ्जु-
र्दूरे पतिः कथय किं करणीयमद्य" ॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अत्रैतं देशं प्रति शीघ्रम् "प्रच्छन्नकामुकस्त्वया प्रेष्यताम्" इति सखीं प्रति कयाचित् द्योत्यते ॥

बोद्धव्यवैशिष्ट्ये यथा ।

"निःशेषच्युतचन्दनं स्तनतटं निर्म्मृष्टरागोऽधरे
नेत्रे दूरमनञ्जने पुलकिता तन्वी तवेयं तनुः ।
मिथ्यावादिनि दूति बान्धवजनस्याज्ञातपीड़ागमे
वापीं स्नातुमितो गतासि न पुनस्तस्याधमस्यान्तिकम्" ॥१॥

अत्र तदन्तिकमेव गतासीति विपरीतलक्षणया लक्ष्यम् ॥ तस्य च रन्तुमिति व्यङ्ग्यं प्रतिपाद्य दूतीवैशिष्ट्याद् बोध्यते ।

अन्यसन्निधिवैशिष्ट्ये यथा ।

"उअ णिच्चलणिप्फन्दाभिसिणीपत्तम्मि रेहइ बलाआ ।
णिम्मलमरगअभाअणपरिट्ठिआ सङ्खसुत्तिव्व" *॥१॥

अत्र बलाकाया निःस्पन्दत्वेन विश्वस्तत्वं तेनास्य देशस्य विजनत्वमतः सङ्केतस्थानमेतदिति कयापि सन्निहितप्रच्छन्नकामुकं प्रत्युच्यते । अत्रैव स्थाननिर्ज्जनत्वरूपव्यङ्ग्यार्थवैशिष्ट्यं प्रयोजकम् ॥

२८, भिन्नकण्ठध्वनिर्धीरैः काकुरित्यभिधीयते ॥२०

इत्युक्तप्रकारायाः काकोर्भेदा आकारादिभ्यो ज्ञातव्याः ॥

एतद्वैशिष्ट्ये यथा ।

"गुरुपरतन्त्रतया वत दूरतरं देशमुद्यतो गन्तुम् ।

---

*उअ निश्चलनिस्पन्दा विसिनीपत्रे राजति बलाका ।
निर्म्मलमरकतभाजनपरिस्थिता शङ्खशुक्तिरिवेति । सं ॥
उअ पश्येत्यर्थः ॥ टी० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अलिकुलकोकिलललिते नेष्यति सखि सुरभिसमयेऽसौ" ॥१॥

अत्र नेष्यति अपि तर्हि एष्यत्येवेति काक्वा व्यज्यते॥

चेष्टावैशिष्ट्ये यथा ।

"सङ्केतकालमनसं विटं ज्ञात्वा विदग्धया ।

हसन्नेत्रार्पिताकूतं लीलापद्मं निमीलितम्"॥ १ ॥

अत्र सन्ध्या सङ्केतकाल इतिपद्मनिमीलनादिचेष्टया कयाचित् द्योत्यते। एवं वक्त्रादीनां व्यस्तसमस्तानां-वैशिष्ट्ये बोद्धव्यम् ॥२०॥

२९, त्रैविध्यादियमर्थानां प्रत्येकं त्रिविधा मता।

अर्थानां वाच्यलक्ष्यव्यङ्ग्यत्वेन त्रिरूपतया सर्वा अप्यनन्तरोक्ता व्यञ्जनास्त्रिविधाः ।। तत्र वाच्यार्थस्य व्यञ्जना यथा। "कालो मधुः" इत्यादि ॥ लक्ष्यार्थस्य यथा। "निःशेषच्युतचन्दनम्" इत्यादि ।। व्यङ्ग्यार्थस्य यथा। "उग्र णिच्चलेत्यादि" ।। प्रकृतिप्रत्ययव्यञ्जनत्वन्तु प्रपञ्चयिष्यते ।

३०, शब्दबोध्यो व्यनक्त्यर्थः शब्दोऽप्यर्थान्तराश्रयः एकस्य व्यञ्जकत्वे तदन्यस्य सहकारिता ।

यतः शब्दो व्यञ्जकत्वेऽर्थान्तरमपेक्षते अर्थोऽपि शब्दम्। तदेकस्य व्यञ्जकत्वे अन्यस्य सहकारिताऽवश्यमङ्गीकार्या॥

३१, अभिधादित्रयोपाधिवैशिष्ट्यात्त्रिविधो मतः शब्दोऽपि वाचकस्तद्वल्लक्षको व्यञ्जकस्तथा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अभिधोपाधिको वाचकः। लक्षणोपाधिको लक्षकः। व्यञ्जनोपाधिको व्यञ्जकः ॥२२॥ किञ्च।

३२, तात्पर्य्याख्यां वृत्तिमाहुः पदार्थान्वयबोधने।
तात्पर्य्यार्थं तदर्थञ्च वाक्यं तद्बोधकं परे॥

अभिधया एकैकपदार्थबोधनविरमाद्वाक्यार्थरूपस्य पदार्थान्वयस्य बोधिका तात्पर्य्यनाम्नी वृत्तिस्तदर्थश्च तात्पर्य्यार्थस्तद्बोधकञ्च वाक्यमित्यभिहितान्वयवादिनां मतम् *।

इति साहित्यदर्पणे वाक्यस्वरूपनिरूपणोनाम द्वितीयः परिच्छेदः ॥*॥ २॥

अथ कोऽयं रस इत्युच्यते।

३३, विभावेनानुभावेन व्यक्तः सञ्चारिणा तथा।
रसतामेति रत्यादिः स्थायी भावः सचेतसाम्॥

विभावादयो वक्ष्यन्ते। सात्विकाश्चानुभावरूपत्वात् न पृथगुक्ताः। व्यक्तो दध्यादिन्यायेन रूपान्तरपरिणतो व्यक्तीकृत एव रसो न तु दीपेन घट इव पूर्व्वसिद्धो व्यज्यते। तदुक्तं लोचनकारैः। "रसाः प्रतीयन्त इति त्वोदनं पचतीतिवद् व्यवहारः" इति। अत्र च रत्यादिपदोपादानादेव प्राप्ते स्थायित्वे पुनः स्थायिपदोपादानं रत्यादीनामपि

* अभिहितानामभिधया लक्षणया वा पदोपस्थापितान्वयबोधवादिनां प्राचीननैयायिकानामित्यर्थः॥ अन्विताभिधानवादिनो भीमांसकगुरवस्तु क्रियाकारकयोः प्रथमत एवान्वयबोधो जायते ततः शक्तिग्रहः। पदविशेषसमभिव्याहारात् तु विशेषस्मृतिरिति किं तात्पर्य्याख्यवृत्तिस्वीकारेणेत्याहुः॥ टी०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रसान्तरेष्वस्थायित्वप्रतिपादनार्थम् । ततश्च हासक्रोधादयः शृङ्गारवीरादौ व्यभिचारिण एव । तदुक्तम् ।"रसावस्थः परस्भावः स्थयितां प्रतिपद्यते" इति ॥१॥

अस्य स्वरूपकथनगर्भं आस्वादप्रकारः कथ्यते ॥

३४,सत्त्वोद्रेकादखण्डस्वप्रकाशानन्दचिन्मयः।
वेद्यान्तरस्पर्शशून्यो ब्रह्मास्वादसहोदरः॥२॥
लोकोत्तरचमत्कारप्राणः कैश्चित् प्रमातृभिः ।
स्वाकारवदभिन्नत्वेनायमास्वाद्यते रसः॥३॥
रजस्तमोभ्यामस्पृष्टं मनः सत्त्वमिहोच्यते ।

इत्युक्तप्रकारो वाच्यमेयविमुखतापादकः कश्चनान्तरोधर्म्मः सत्त्वं तस्योद्रेकः रजस्तमसी अभिभूयाविर्भावः । अत्र च हेतुस्तथाविधालौकिककाव्यार्थपरिशीलनम्। अखण्डइत्येक एवायं विभावादिरत्यादिप्रकाशसुखचमत्कारात्मकः । अत्रहेतुं वक्ष्यामः । स्वप्रकाशत्वाद्यपि वक्ष्यमाणरीत्या । चिन्मय इति स्वरूपार्थे मयट् । चमत्कारश्चित्तविस्तारस्वरूपो विस्मयापरपर्य्यायः ॥ तत्प्राणत्वञ्चास्मद्द्रुहिणपितामहसहृदयगोष्ठीगरीष्ठकविपण्डितमुख्यश्रीमन्नारायणपादैरुक्तम् । तदाह धर्म्मदत्तः स्वग्रन्थे ।

"रसे सारश्चमत्कारः सर्व्वत्राप्यनुभूयते ।
तच्चमत्कारसारत्वे सर्व्वत्राप्यद्भुतो रसः ॥१॥
तस्मादद्भुतमेवाह कृती नारायणो रसम्"इति ॥२॥

कैश्चिदिति प्राक्तनपुण्यशालिभिः ॥ यदुक्तम् । "पुण्यवन्तः प्रमिण्वन्ति योगिवद्रससन्ततिम्" इति ॥ यद्यपि ,,स्वादः काव्यार्थसम्भेदादात्मानन्दसमुद्भवः" इत्युक्तदिशा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रसस्यास्वादानतिरिक्तत्वमुक्तं तथापि "रसः स्वाद्यते" इति काल्पनिकं भेदमुररीकृत्य कर्म्मकर्त्तरि वा प्रयोगः ॥ तदुक्तम्। "रस्यमानतामात्रसारत्वात् प्रकाशशरीरादनन्य एव हि रसः" इति॥ एवमन्यत्राप्येवंविधस्थलेषूपचारेण प्रयोगाज्ञेयाः। नन्वेतावता रसस्याज्ञेयत्वमुक्तं भवतीति व्यञ्जनायाश्च ज्ञानविशेषत्वाद् द्वयोरैक्यमापतितम्। ततश्च।

"स्वज्ञानेनान्यधीहेतुः सिद्धेऽर्थे व्यञ्जको मतः।
यथा दीपोऽन्यथाभावे को विशेषोऽस्य कारकात्" ॥१॥

इत्युक्तदिशा घटप्रदीपवद् व्यङ्ग्यव्यञ्जकयोः पार्थक्यमेवेति कथं रसस्य व्यङ्ग्यतेति चेत् सत्यमुक्तम्। अतएवाहुः। "विलक्षण एवायं कृतिज्ञप्तिभेदेभ्यः स्वादनाख्यः कश्चिद् व्यापारः"। अत एव हि रसनास्वादनचमत्करणादयोविलक्षणा एव व्यपदेशा इति अभिधादिविलक्षणव्यापारताऽत्र प्रसाधनग्रहिलैरस्माभी रसादीनां व्यङ्ग्यत्वमुक्तं भवतीति॥

ननु तर्हि करुणादीनां रसानां दुःखमयत्वाद्रसत्वं न स्यादित्युच्यते।

३५, करुणादावपि रसे जायते यत् परं सुखम्।
सचेतसामनुभवः प्रमाणं तत्र केवलम्॥

आदिशब्दाद्वीभत्सभयानकादयः ॥ ४॥

तथाप्यसहृदयानांसुखमुद्रणाय पद्यान्तरमुच्यते।

किञ्च तेषु यदा दुःखं न कोऽपि स्यात्तदुन्मुखः।
३६, ॥ ५॥

न हि कश्चित् सचेता आत्मनो दुःखाय प्रवर्त्तते। करुणादिषु च सकलस्यापि साभिनिवेशप्रवृत्तिदर्शनात्॥ ५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अनुपपत्त्यन्तरमाह

३६, तथा रामायणादीनां भविता दुःखहेतुता॥

करुणरसस्य दुःखहेतुत्वात् करुणरसप्रधानरामायणादिप्रबन्धानामपि दुःखहेतुत्वप्रसङ्गः स्यात् ॥

ननु कथं दुःखकारणेभ्यः सुखोत्पत्तिरित्याह ।

३७, हेतुत्वं शोकहर्षादेर्गतेभ्यो लोकसंश्रयात्।
शोकहर्षादयो लोके जायन्तां नाम लौकिकाः॥
अलौकिकविभावत्वं प्राप्तेभ्यः काव्यसंश्रयात् ।
सुखं सञ्जायते तेभ्यः सर्वेभ्योऽपीति का क्षतिः॥

ये खलु रामवनवासादयो लोके "दुःखकारणानि" इत्युच्यन्ते त एव हि काव्यनाट्यसमर्पिता अलौकिकविभावनव्यापारवत्तया कारणशब्दवाच्यत्वं विहायालौकिकविभावशब्दवाच्यत्वं भजन्ते। तेभ्यश्च सुरते दन्तघातादिभ्य इव सुखमेव जायते। अतश्च "लौकिकशोकहर्षादिकारणेभ्यो लौकिकशोकहर्षादयो जायन्ते" इति लोक एव प्रतिनियमः काव्ये पुनः "सर्वेभ्योऽपिविभावादिभ्यः सुखमेव जायते" इति नियमान्न कश्चिद्दोषः ॥

कथं तर्हि हरिश्चन्द्रादिचरितस्य काव्यनाट्ययोरपि दर्शनश्रवणाभ्यामश्रुपातादयो जायन्त इत्युच्यते ।

३८, अश्रुपातादयस्तद्वद्द्रुतत्वाच्चेतसो मताः ।

तर्हि कथं काव्यतः सर्वेषामीदृशीरसाभिव्यक्तिर्न जायत इत्याह ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

३९, न जायते तदा स्वादो विना रत्यादिवासनाम्

वासना चेदानीन्तनी प्राक्तनी च रसास्वादहेतुः । तत्र यदि आद्या न स्याच्छ्रोतीय जरन्मीमांसकादीनामपि सा स्यात् । यदि द्वितीया न स्याद् यद्रागिणामपि केषाञ्चिद्रसोद्बोधो न दृश्यते तन्न स्यात् ॥

उक्तञ्च धर्म्मदत्तेन ।

"सवासनानां सभ्यानां रसस्यास्वादनं भवेत् ।
निर्व्वासनास्तु रङ्गान्तः काष्ठकुड्याश्मसन्निभाः" ॥१॥ इति॥

ननु कथं रामादिरत्याद्युद्बोधकारणैः सीतादिभिः सामाजिकरत्याद्युद्बोध इत्युच्यते ।

व्यापारोऽस्ति विभावादेर्नाम्ना साधारणीकृतिः ॥४०॥

तत् प्रभावेन यस्यासन् पाथोधिप्लवनादयः ॥
प्रमाता तदभेदेन स्वात्मानं प्रतिपद्यते ।

ननु कथं मनुष्यमात्रस्य समुद्रलङ्घनादावुत्साहोद्बोध इत्युच्यते ।

४१, उत्साहादिसमुद्बोधः साधारण्याभिमानतः
नृणामपि समुद्रादिलङ्घनादौ न दुष्यति ।

रत्यादयोऽपि साधारण्येन प्रतीयन्त इत्याह ।

४२, साधारण्येन रत्यादिरपि तद्वत् प्रतीयते ॥

रत्यादेरपि ह्यात्मगतत्वेन प्रतीतौ सभ्यानां व्रीडातङ्कादिर्भवेत्परगतत्वेन त्वरस्यतापातः॥ विभावादयोऽपि प्रथमतः साधारण्येन प्रतीयन्त इत्याह ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

४३, परस्य न परस्येति ममेति न ममेति च॥
तदास्वादे विभावादेः परिच्छेदो न विद्यते ।

ननु तथापि कथमेवमलौकिकत्वमेतेषां विभावादीनामित्युच्यते ।

४४, विभावनादिव्यापारमलौकिकत्वमुपेयुषाम्॥
अलौकिकत्वमेतेषां भूषणं न तु दूषणम् ।

आदिशब्दादनुभावनसञ्चारणे । तत्र विभावनं रत्यादेर्विशेषेणास्वादाङ्कुरणयोग्यतानयनम् ॥ अनुभावनमेवम्भूतस्य रत्यादेःसमनन्तरमेव रसादिरूपतया भावनम् । सञ्चारणं तथाभूतस्यैतस्य सम्यक् चारणम् ।

विभावादीनां यथासङ्ख्यं कारणकार्य्यसहकारित्वे कथं त्रयाणामपि रसोद्बोधे कारणत्वमित्युच्यते ।

४५, कारणं कार्य्यसञ्चारिरूपा अपि हि लोकतः॥
रसोद्बोधे विभावाद्याः कारणान्येव ते मताः ।

ननु तर्हि कथं रसास्वादे तेषामेकः प्रतिभास इत्युच्यते ।

४६, प्रतीयमानः प्रथमं प्रत्येकं हेतुरुच्यते ॥
ततः सम्बलितः सर्वो विभावादिः सचेतसाम् ।
प्रपानकरसन्यायाच्चर्व्यमाणो रसो भवेत् ॥

यथा खण्डमरिचादीनां सम्मेलनादपूर्व्व इव कश्चिदास्वादःप्रपानकरसे सञ्जायते विभावादिसम्मेलनादिहापि तथेत्यर्थः॥ ननु यदि विभावानुभावव्यभिचारिभिर्म्मिलितैरेव रसस्तत् कथमेकस्य द्वयोर्व्वा सद्भावेऽपि सस्यादित्युच्यते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

४७, सद्भावश्चेद्विभावादेर्द्वयोरेकस्य वा भवेत् ।
झटित्यन्यसमाक्षेपे तदा दोषो न विद्यते ॥

अन्यसमाक्षेपश्च प्रकरणादिवशात् । यथा ।

"दोर्वाच्यं शरदिन्दुकान्ति वदनं बाहू न तावंसयोः
सङ्क्लिष्टं निविडोन्नतस्तनमुरःपार्श्वे प्रमृष्टे इव ।
मध्यः पाणिमितो नितम्बि जघनं पादावुदग्राङ्गुली
च्छन्दो नर्त्तयितुर्ययैव मनसः सृष्टं तथास्याः वपुः" ॥

अत्र मालविकामभिलषतोऽग्निमित्रस्य मालविकारूपविभावमात्रवर्णने सञ्चारिणामौत्सुक्यादीनामनुभावानाञ्च नयनविस्फारादीनामौचित्यादेवाक्षेपः । एवमन्याक्षेपेऽप्यूह्यम् । "अनुकार्य्यगतो रसः" इति वदतः प्रत्याह ।

४८, पारिमित्याल्लौकिकत्वात् सान्तरायतया तथा ।
अनुकार्य्यस्य रत्यादेरुद्बोधो न रसो भवेत् ।

सीतादिदर्शनादिजो रामादिरत्याद्युद्बोधो हि परिमितो लौकिको नाट्यकाव्यदर्शनादेः सान्तरायश्च । तस्मात् कथं रसरूपतामियात् । रसस्यैतद्धर्म्मत्रितयविलक्षणधर्म्मकत्वात् ।

अनुकर्त्तृगतत्वञ्चास्य निरस्यति ।

४९, शिक्षाभ्यासादिमात्रेण राघवादेः स्वरूपताम् ।
दर्शयन् नर्त्तको नैव, रसस्यास्वादको भवेत् ॥

किञ्च ।

५०, काव्यार्थभावनेनायमपि सभ्यपदास्पदम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यदि पुनर्नटोऽपि काव्यार्थभावनया रामादिरूपतामात्मनो दर्शयेत् तदा सोऽपि सभ्यमध्य एव गण्यते ।

५१, नायं ज्ञाप्यः स्वसत्तायां प्रतीत्यव्यभिचारतः॥

यो हि ज्ञाप्यो घटादिः सन्नपि कदाचिद्ज्ञातो भवति । न ह्ययं तथा प्रतीतिमन्तरेणाभावात् ।

५२, यस्मादेष विभावादिसमूहालम्बनात्मकः ।
तस्मान्नकार्य्यः

यदि रसः कार्य्यः स्यात् तदा विभावादिज्ञानकारणक एव स्यात् । ततश्च रसप्रतीतिकाले विभावादयो न प्रतीयेरन् । कारणज्ञानतत्कार्य्यज्ञानयोर्युगपद्दर्शनात् । नहि चन्दनस्पर्शज्ञानंतज्जन्यसुखज्ञानञ्चैकदा सम्भवति । रसस्य च विभावादिसमूहालम्बनात्मकतयैव प्रतीतेर्न विभावादिज्ञानकारणकत्वमित्यभिप्रायः ॥

५३, नो नित्यः पूर्व्वसंवेदनोज्झितः ॥
असंवेदनकाले हि न भावोऽप्यस्य विद्यते ।

न खलु नित्यस्य वस्तुनोऽसंवेदनकालेऽसम्भवो नापि भविष्यन् । साक्षादानन्दमयस्वप्रकाशरूपत्वात् । कार्य्यज्ञाप्यविलक्षणभावान् नो वर्त्तमानोऽपि ।।

५४, विभावादिपरामर्शविषयत्वात् सचेतसाम्॥
परानन्दमयत्वेन संवेद्यत्वादपि स्फुटम् ।
न निर्व्विकल्पकं ज्ञानं तस्य ग्राहकमिष्यते॥
तथाऽभिलापसंसर्गयोग्यत्वविरहान्न च ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सविकल्पकसंवेद्यः

सविकल्पकज्ञानसम्वेद्यानां हि वचनप्रयोगयोग्यता न तु रसस्य तथा ।

५५, साक्षात्कारतया न च ॥

परोक्षस्तत्प्रकाशो नापरोक्षः शब्दसम्भवात् ।

तत् कथय कीदृगस्य तत्त्वम् ॥ एवमस्मृतादृष्टपूर्व्वनिरूपणप्रकारस्येत्याह ।

५६, तस्मादलौकिकः सत्यं वेद्यः सहृदयैरयम् ॥

तत् किं पुनः प्रमाणं तस्य सद्भाव इत्याह ।

५७, प्रमाणं चर्व्वणैवात्र स्वाभिन्ने विदुषां मतम्

चर्व्वणाऽऽस्वादनम् । तच्च "स्वादः कव्यार्थसम्भेदादात्मानन्दसमुद्भवः" इत्युक्तप्रकारम् ॥

ननु यदि रसो न कार्य्यस्तत् कथम्मुनिभिर्ष्णा "विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः" इति लक्षणं कृतमित्युच्यते ॥

५८, निष्पत्त्या चर्व्वणस्याय निष्पत्तिरुपचारतः

यद्यपि रसाभिन्नतया चर्व्वणस्यापि न कार्य्यत्वम् तथापि तस्य कादाचित्कतया उपचरितेन कार्य्यत्वं कार्य्यत्वमुपचर्य्यते ॥

५९, अवाच्यत्वादिकं तस्य वक्ष्येव्यञ्जनरूपणे ।

तस्य रसस्य । आदिशब्दादलक्ष्यत्वादि ॥

ननु यदि मिलिता रत्यादयो रसस्तत् कथमस्य प्रकाशत्वं कथं वाऽखण्डत्वमित्याह ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

६०, रत्यादिर्ज्ञानतादात्म्यादेव यस्माद्रसोभवेत्॥
अतोऽस्य स्वप्रकाशत्वमखण्डत्वञ्च सिद्ध्यति ।

यदि रत्यादिकं प्रकाशशरीरादतिरिक्तं स्यात् तदैवास्य स्वप्रकाशत्वं न सिद्ध्येत् । न च तथा । तादात्म्याङ्गीकारात् । यदुक्तम् । "यद्यपि रसानन्यतया चर्व्वणान कार्य्या तथापि कादाचित्कतया कार्य्यत्वमुपकल्प्य तदेकात्मन्यनादिवासनापरिणतिरूपे रत्यादिभागेऽपि व्यवहारः" इति । सुखादितादात्म्याङ्गीकारे चास्माकीं सिद्धान्तशय्यामधिशय्य दिव्य वर्ष सहस्रं प्रमोदनिद्रमुपेयाः" इति च । "अभिन्नोऽपि स प्रमात्रा वासनोपनीतरत्यादितादात्म्यगोचरीकृतः" इति च । ज्ञानस्य स्वप्रकाशत्वमनङ्गीकुर्व्वतामुपरि वेदन्तिभिरेव निपातनीयो दण्डः। तादात्म्यादेवास्याखण्डत्वम् । रत्यादयो हि प्रथममेकैकशः प्रतीयमानाः सर्व्वेऽप्येकीभूताःस्फुरन्त एव रसतामापद्यन्ते ॥

तदुक्तम् ॥

"विभावा अनुभावाश्च सात्त्विका व्यभिचारिणः ।
प्रतीयमानाः प्रथमं खण्डशो यान्त्यखण्डताम्" ॥

इति । "परमार्थतस्त्वखण्ड एवायं वेदान्तप्रसिद्धब्रह्मतत्त्ववद्वेदितव्यः" इति च ॥

अथ के ते विभावानुभावव्यभिचारिण इत्यपेक्षायांविभावमाह ।

६१ रत्याद्युद्बोधका लोके विभावाःकाव्यनाट्ययोः

ये हि लोके रामादिगतरतिहासादीनामुद्बोधकार-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

णानि सीतादयस्त एव काव्ये नाट्ये च निवेशिताः सन्तो-"विभाव्यन्ते आस्वादाङ्कुरप्रादुर्भावयोग्याः क्रियन्ते सामाजिकरत्यादिभावा एभिः" इति विभावा उच्यन्ते ॥

तदुक्तम्भर्तृहरिणा ।

"शब्दोपहितरूपांस्तान् बुद्धेर्विषयतां गतान् ।
प्रत्यक्षानिव कंसादीन् साधनत्वेन मन्यते" ॥१॥ इति

तद्भेदानाह ।

६२, आलम्बनोद्दीपनाख्यौ तस्य भेदावुभौ स्मृतौ ॥

स्पष्टम् ॥ तत्र ।

६३, आलम्बनं नायकादिस्तमालम्ब्य रसोद्गमात् ।

आदिशब्दान्नायिकाप्रतिनायकादयः । अत्र यो यस्य विभावः स तत्स्वरूपवर्णने वक्ष्यते । तत्र नायकः ॥

६४,

त्यागी कृती कुलीनः सुश्रीको रूपयौवनोत्साही ॥
दक्षोऽनुरक्तलोकस्तेजोवैदग्ध्यशीलवान् नेता ।

दक्षः क्षिप्रकारी । शीलं सद्वृत्तम् । एवमादिगुणसम्पन्नो नेता नायको भवति । तद्भेदानाह ।

६५, धीरोदात्तो धीरोद्धतस्तथा धीरललितश्च ॥
धीरप्रशान्त इत्ययमुक्तः प्रथमश्चतुर्भेदः ।

स्पष्टम् अत्र धीरोदात्तः ।

६६, अविकत्थनः क्षमावानतिगम्भीरो महासत्त्वः ॥
स्थेयान् निगूढमानो धीरोदात्तो दृढव्रतः कथितः ।

अविकत्थनोऽनात्मश्लाघाकरः । महासत्त्वो हर्षशोकाद्य-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नभिभूतस्वभावः । निगूढमानो विनयच्छन्नगर्व्वः ।
दृढव्रतोऽङ्गीकृतनिर्व्वाहकः । यथा रामयुधिष्ठिरादिः॥

अथ धीरोद्धतः

६७, मायापरःप्रचण्डश्चपलोऽहङ्कारदर्पभूयिष्ठः।
आत्मश्लाघानिरतो धीरैर्धीरोद्धतः कथितः ॥

यथा भीमसेनादिः॥ अथ धीर ललितः ।

६८,
निश्चिन्तो मृदुरनिशंकलापरो धीरललितःस्यात्

कला नृत्यादिका । यथा रत्नावल्यादौ वत्सराजादिः॥

अथ धीर प्रशान्तः ।

६९,

सामान्यगुणैर्भूयान्द्विजादिकोधीरप्रशान्तःस्यात्॥

यथा मालतीमाधवादौ माधवादिः ॥

एषाञ्च शृङ्गारिरूपत्वे भेदानाह

७०,
एभिर्दक्षिणधृष्टानुकूलशठरूपिभिस्तु षोडशधा।

तत्र तेषां धीरोदात्तादीनां प्रत्येकं दक्षिणधृष्टानुकूल-
शठत्वेन षोडशप्रकारो नायकः ॥

७१,
एषु त्वनेकमहिलासु समरागो दक्षिणःकथितः

द्वयोस्त्रिचतुःप्रभृतिषु नायिकासु तुल्यानुरागो दक्षिण-
नायकः । यथा ।

"स्नाता तिष्ठति कुन्तलेश्वरसुता वारोऽङ्गराजस्वसु-
र्व्वैतैरात्रिरियं जिता कमलया देवी प्रसाद्याद्य च ।
इत्यन्तःपुरसुन्दरीः प्रति मया विज्ञाय विज्ञापिते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

देवेनाऽप्रतिपत्तिमूढमनसा द्वित्राः स्थितं नाडिकाः"॥१॥

७२, कृतागाअपिनिःशङ्कस्तर्ज्जितोऽपिनलज्जितः
दृष्टदोषोऽपि मिथ्यावाक् कथितो धृष्टनायकः॥

यथा मम।

"शोणं वीक्ष्य मुखं विचुम्बितुमहं यातः समीपं ततः
पादेन प्रहृतं तया सपदि तं धृत्वा सहासे मयि।
किञ्चित् तत्र विधातुमक्षमतया वाष्पं त्यजन्त्याः सखे
ध्यातश्चेतसि कौतुकं वितनुते कोपोऽपि वामभ्रुवः"॥१॥

७३, अनुकूल एकनिरतः

एकस्यामेव नायिकायामासक्तोऽनुकूलनायकः। यथा।

"अस्माकं सखि वाससी न रुचिरे ग्रैवेयकं नोज्ज्वलं-
नो वक्रा गतिरुद्धतं न हसितं नैवास्ति कश्चिन्मदः।
किन्त्वन्येऽपि जना वदन्ति सुभगोऽप्यस्याः प्रियो नान्यतो-
दृष्टिं निक्षिपतीति विश्वमियता मन्यामहे दुःस्थितम्"॥

७४, शठोऽयमेकत्र बद्धभावो यः।
दर्शितबहिरनुरागो विप्रियमन्यत्र गूढमाचरति॥

यः पुनरेकस्यामेव नायिकायां बद्धभावो द्वयोरपि नायिकयोर्बहिर्दर्शितानुरागोऽन्यस्यां नायिकायां गूढं-विप्रियमाचरति स शठनायकः। यथा।

"शठोऽन्यस्याः काञ्चीमणिरणितमाकर्ण्य सहसा
यदाश्लिष्यन्नेव प्रशिथिलभुजग्रन्थिरभवः।
तदेतत् क्वाचक्ष्ये घृतमधुमयत्वद्वचो-
विषेणाघूर्णन्तो किमपि न सखी मे गणयति"॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

७५, एषाञ्च त्रैविध्यात् सर्वेषामुत्तममध्याधमत्वेन उक्ता नायकभेदाश्चत्वारिंशत्तयाऽष्टौ च ॥

सर्वेषामुक्तषोडशभेदानाम् ॥

अथ प्रसङ्गादेतेषां सहायानाह ।

७६, दूरावर्त्तिनि स्यात् तस्य प्रासङ्गिकेतिवृत्ते तु। किञ्चित्तद्गुणहीनः सहाय एवास्य पीठमर्द्दाख्यः॥

तस्य नायकस्य बहुव्यापिनि प्रसङ्गसङ्गते इतिवृत्तेऽनन्तरोक्तैर्नायकसामान्यगुणैः किञ्चिदूनः पीठमर्द्दनामा सहायो भवति । यथा रामचन्द्रादीनां सुग्रीवादयः ॥

अथ शृङ्गारसहायाः ।

७७, शृङ्गारस्य सहायाविटचेटविदूषकाद्याः स्युः भक्ता नर्म्मसु निपुणाः कुपितवधूमानभञ्जनाः शुद्धाः

आदिशब्दान्मालाकाररजकताम्बूलिकगान्धिकादयः ॥

तत्र विटः ।

७८, सम्भोगहीनसम्पद् विटस्तु धूर्त्तः कलैकदेशज्ञः वेशोपचारकुशलो वाग्मी मधुरोऽथ बहुमतो गोष्ठ्याम्॥

चेटः प्रसिद्ध एव ।

७९, कुसुमवसन्ताद्यभिधः कर्म्मवपुर्वेशभाषाद्यैः। हास्यकरः कलहरतिर्विदूषकः स्यात् स्वकर्मज्ञः॥

स्वकर्म्म भोजनादि ॥

अर्थचिन्तनसहायमाह ।

८०, मन्त्री स्यादर्थचिन्तायामर्थास्तन्त्रावपादयः।

यत्त्वत्र सहायकथनप्रस्तावे "मन्त्रस्त्रीभयञ्चापि सखा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्यार्थचिन्तने 'इति केनचिल्लक्षणं कृतं तदपि राज्ञोऽर्थचिन्तनोपायलक्षणप्रकरणे लक्षितव्यं न तु सहायकथनप्रकरणे नायकस्य । "अर्थचिन्तने मन्त्री सहायः" इत्युक्तेऽपि नायकस्यार्थत एव सिद्धत्वात् । यदप्युक्तम् । "मन्त्रिणा ललितः शेषा मन्त्रिस्वायत्तसिद्धयः" इति* तदपि खलक्षणकथनेनैव धीरललितस्य मन्त्रिमात्रायत्तार्थचिन्तनोपपत्तेर्गतार्थम् । न चार्थचिन्तने तस्य मन्त्री सहायः किन्तु स्वयमेव निष्पादकः । तस्यर्थचिन्तनाद्यभावात् ॥ अथान्तःपुरसहायाः ।

तद्वदवरोधे ।

८१,

वामनषण्डकिरातम्लेच्छाभीराः शकारकुब्जाद्याः
मदमूर्खताभिमानी दृष्कुलतैश्वर्यसंयुक्तः ।
सोऽयमनूढाभ्राता राज्ञः श्यालः शकार इत्युक्तः ॥

आद्यशब्दान्मूकादयः । तत्र षण्डवामनकिरातकुब्जादयो यथा रत्नावल्याम् ।

"नष्टं वर्षवरैर्मनुष्यगणनाभावादपास्य त्रपा-
मन्तः कञ्चुकिकञ्चुकस्य विशति त्वासादयं वामनः ।
पर्यन्ताश्रयिभिर्निजस्य सदृशं नाम्नः किरातैः कृतं-
कुब्जा नीचतयैव यान्ति शनकैरात्मक्षणाशङ्कनः" ॥

---

* मन्त्रिणेति । आयत्तसिद्धिरित्यन्वयः । ललितो धीरललितः । शेषा धीरोदात्तादयः । खलक्षणेति । निश्चिन्त इति धीरललितलक्षणविशिष्टेन तस्यार्थचिन्ताद्यभावः । तेन च मन्त्रिमात्रायत्तार्थसिद्धिकत्वं प्रतीयते इति भावः ॥ इत्यादिविवरणदर्शनेन लक्षणास्थपथमैकवचनान्तशेषशब्दस्य चतुर्थ्येकवचनान्तसिद्धये इति पदस्य च मुद्रितपूर्वस्यापि अनाकरत्वं हेयत्वं च प्रतीयते ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शकारो मृच्छकटिकादिषु प्रसिद्धः । अन्येऽपि यथा दर्शनं ज्ञातव्याः ॥ अथ दण्डसहायाः ।

८२, दण्डेषु सुहृत्कुमाराटविकाःसामन्तसैनिकाद्याश्च ।

दुष्टनिग्रहो दण्डः स्पष्टम् ॥ अथ धर्म्मसहायाः ।

८३, ऋत्विक्पुरोधसःस्युर्ब्रह्मविदस्तापसास्तथाधर्मे

ब्रह्मविदो वेदविद आत्मविदो वा । तत्र ।

८४, उत्तमाः पीठमर्द्दाद्याः

आद्यशब्दान्मन्त्रिपुरोहितादयः ।

८५, मध्यौ विटविदूषकौ ।

तथा शकारचेटाद्या अधमाः परिकीर्त्तिताः ॥

आद्यशब्दात्ताम्बूलिकगान्धिकादयः ॥

अथ प्रसङ्गाद् दूतानां विभागगर्भलक्षणमाह ।

८६, निसृष्टार्थो मितार्थश्च तथा सन्देशहारकः।

कार्य्यप्रेष्यस्त्रिधा दूतो दूत्यश्चापि तथाविधाः ॥

तत्र कार्य्यप्रेष्यो दूत इति लक्षणम् । तत्र ।

८७, उभयोर्भावमुन्नीय स्वयं वदति चोत्तरं ।

सुश्लिष्टं कुरुते कार्य्यं निसृष्टार्थस्तु संस्मृतः ॥

उभयोरिति येन प्रेषितो यदन्तिकं प्रेषितश्च ॥

८८, मितार्थभाषीकार्य्यस्य सिद्धिकारीमितार्थकः।

यावद्भाषितसन्देशहारः सन्देशहारकः ॥

अथ सात्त्विका नायकगुणाः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

८९, शोभा विलासो माधुर्य्यङ्गाम्भीर्य्यं धैर्य्यतेजसी
ललितौदार्य्यमित्यष्टौ सत्त्वजाः पौरुषा गुणाः ॥

तत्र

९०, शूरतादक्षता सत्यं महोत्साहोऽनुरागिता।
नीचे घृणाऽधिके स्पर्द्धा यतः शोभेति तां विदुः ॥

तत्रानुरागिता यथा ।

"अहमेव मतो महीपतेरिति सर्व्वः प्रकृतिष्वचिन्तयत् ।
उदधेरिव निम्नगाशतेष्वभवन् नास्य विमानना क्वचित्"॥

एवमन्यत्रापि ॥ अथ विलासः ।

९१, धीरादृष्टिर्गतिश्चित्रा विलासे सस्मितं वचः।

यथा

"दृष्टिस्तृणीकृतजगत्त्रयसत्त्वसारा
धीरोद्धता नमयतीव गतिर्धरित्रीम् ।
कौमारकेऽपि गिरिवद्गुरुतान्दधानो-
वीरो रसः किमयमित्युत दर्प एषः" ॥

९२, संक्षोभेष्वप्यनुद्वेगो माधुर्य्यं परिकीर्तितम्॥

ऊह्यमुदाहरणम् ॥

९३, भीशोकक्रोधहर्षाद्यैर्गाम्भीर्य्यं निर्विकारता ।

यथा ।

"आहृतस्याभिषेकाय विसृष्टस्य वनाय च ।
न मया लक्षितस्तस्य स्वल्पोऽप्याकारविभ्रमः" ॥

९४, व्यवसायादचलनं धैर्य्यं विघ्ने महत्यपि ॥

यथा ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

"श्रुताप्सरोगीतिरपि क्षणेऽस्मिन्
हरः प्रसङ्ख्यानपरो बभूव ।
आत्मेश्वराणां न हि जातु विघ्नाः
समाधिभेदप्रभवो भवन्ति" ॥

९५, अधिक्षेपापमानादेः प्रयुक्तस्य परेण यत् ।
प्राणात्ययेऽप्यसहनं तत्तेजः समुदाहृतम् ॥
वाग्वेशयोर्मधुरता तद्वच्छृङ्गारचेष्टितं ललितम् ।
दानं सप्रियभाषणमौदार्य्यं शत्रुमित्रयोः समता॥
एषामप्युदाहरणान्यूह्यानि ॥

९६, अथ नायिका त्रिविधा स्वाऽन्या साधारणस्त्रीति
नायकसामान्यगुणैर्भवति यथासम्भवैर्युक्ता ॥

नायिका पुनर्नायकसामान्यगुणैस्त्यागादिभिर्यथासम्भवैर्युक्ता भवति । सा च स्वस्त्री अन्यस्त्रीसाधरणस्त्रीति त्रिविधा ॥ तत्र स्वस्त्री ।

॥९७॥
विनयार्ज्जवादियुक्ता गृहकर्म्मपरा पतिव्रता स्वीया
यथा ।

"लज्जापज्जत्तपसाहणाइं परभत्तिणिप्पिवासाइं ।
अविणयदुम्मेहाइं धन्नाणं घरे कलत्ताइं"* ॥

९८, सापि कथिता त्रिविधा मुग्धा मध्या प्रगल्भेति
तत्र ।

* लज्जापर्य्याप्तप्रसाधनानि परभर्तृनिष्पिपासानि ।
अविनय[illegible]धांसि धन्यानां गृहे कलत्राणि ॥ सु० । टी० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

९९, प्रथमावतीर्णयौवनमदनविकारा रतौ वामा
कथिता मृदुश्च माने समधिकलज्जावती मुग्धा ॥

तत्र प्रथमावतीर्णयौवना यथा मम तातपादानाम् ।

"मध्यस्य प्रथिमानमेति जघनं वक्षोजयोर्मन्दतां-
दूरं यात्युदरञ्च रोमलतिका नेत्रार्ज्जवं धावति ।
कन्दर्पं परिवोच्य नूतनमनोराज्याभिषिक्तं क्षणा-
दङ्गानीव परस्परं विदधते निर्लूण्ठनं सुभ्रुवः" ॥

प्रथमावतीर्णमदनविकारा यथा मम प्रभावतीपरिणये ।

"दत्ते सालसमन्थरं भुवि पदं निर्य्याति नान्तःपुरान्
नोद्दामं हसति क्षणात् कलयते क्रोयन्त्रणां कामपि ।
किञ्चिद्भावगभीरवक्रिमलवस्पृष्टं मनाग्भाषते
सम्भ्रूभङ्गमुदीक्षते प्रियकथामुल्लासयन्तीं सखीम्" ।

रतौ वामा यथा ।

दृष्टा दृष्टिमधो ददाति कुरुते नालापमाभाषिता
शय्यायां परिवृत्य तिष्ठति बलादालिङ्गिता वेपते ।
निर्य्यान्तीषु सखीषु वासभवनान्निगन्तुमेवेहते
जाता वामतयेव संप्रति ममप्रीत्यै नवोढा प्रिया" ॥

माने मृदुर्यथा ।

"सा पत्युः प्रथमापराधसमये सख्योपदेशं विना
नो जानाति सविभ्रमाङ्गवलना वक्रोक्तिसंसूचनम् ।
स्वच्छैरच्छकपोलमूलगलितैः पर्य्यस्तनेत्रोत्पला
बाला केवलमेव रोदिति लुठल्लोलालकैरम्बुभिः" ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समधिकलज्जावती। यथा "दत्ते सालसमन्थरमित्यत्र श्लोके"॥ अत्र समधिकलज्जावत्त्वेनापि लज्जाया रतिवामताया-विच्छित्तिविशेषवत्तया पुनः कथनम् ॥ अथ मध्या ।

१००, मध्या विचित्रसुरता प्ररूढस्मरयौवना ।
ईषत्प्रगल्भवचना मध्यमव्रीडिता मता ॥

तत्र विचित्रसुरता । यथा ।

"कान्ते तया कथमपि प्रथितं मृगाक्ष्या-
श्चातुर्य्यमुद्धतमनोभवया रतेषु ।
तत्कूजितान्यनुवदद्भिरनेकवारं-
शिष्यायितं गृहकपोतशतैर्यथास्याः" ॥

प्ररूढस्मरा। यथाऽत्रैवोदाहरणे ॥प्ररूढयौवना। यथा मम।

"नेत्रे खञ्जनगञ्जने सरसिजप्रत्यर्थि पाणिद्वयं-
वक्षोजौ करिकुम्भविभ्रमकरीमत्युन्नतिं गच्छतः ।
कान्तिः काञ्चनचम्पकप्रतिनिधिर्वाणी सुधास्पर्द्धिनी
स्मेरेन्दीवरदामसोदरवपुस्तस्याः कटाक्षच्छटा" ॥

एवमन्यत्रापि ॥ अथ प्रगल्भा ।

१०१, स्मरान्धा गाढतारुण्या समस्तरतकोविदा ।
भावोन्नता दूरव्रीडा प्रगल्भाऽऽक्रान्तनायका॥

स्मरान्धा । यथा ।

"धन्यासि या कथयसि प्रियसङ्गमेऽपि
विस्रब्धचाटुकशतानि रतान्तरेषु ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नीवीं प्रति प्रणिहिते तु करे प्रियेण
सख्यः शपामि यदि किञ्चिदपि स्मरामि" ॥

गाढ़तारुण्या । यथा ।

"अत्युन्नतस्तनभुरो नयने सुदीर्घे
वक्रे भ्रुवावतितरां वचनं ततोऽपि ।
मध्योऽधिकं तनुरनूनगुरुर्नितम्बो
मन्दा गतिः किमपि चाद्भुतयौवनायाः" ॥

विविधसुरतज्ञा । यथा ।

"क्वचित्ताम्बूलाक्तः क्वचिदगरुपङ्काङ्कमलिनः
क्वचिच्चूर्णोद्गारी क्वचिदपि च सालक्तकपदः ।
वलीभङ्गाभोगैरलकपतितैः शीर्णकुसुमैः
स्त्रियाः सर्व्वावस्थं कथयति रतं प्रच्छदपटः" ॥

भावोन्नता । यथा ।

"मधुरवचनैः सभ्रूभङ्गैः कताङ्गुलितर्ज्जनै-
रलसवलितैरङ्गन्यासैर्मुहोत्सववन्धुभिः ।
असकृदसकृत् स्मारस्मारैरपाङ्गविलोकितै-
स्त्रिभुवनजयी सा पञ्चेषोः करोति सहायताम्" ॥

स्वल्पव्रीड़ा । यथा । "धन्यासि या कथयसीत्यत्रैव" ॥

आक्रान्तनायका । यथा ।

"स्वामिन् भङ्गुरयालकं सतिलकं भालं विलासिन् कुरु
प्राणेश त्रुटितं पयोधरतटे हारं पुनर्योजय ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इत्युक्त्वा सुरतावसानसमये संपूर्णचन्द्राननां
स्पृष्टा तेन तथैव जातपुलका प्राप्ता पुनर्मोहनम्" ॥

मध्याप्रगल्भाभेदान्तराण्याह ।

१०२ते धीरा चाथधीरा च धीराधीरेति षड्विधे।

ते मध्याप्रगल्भे। तत्र ।

१०३,प्रियं सोत्प्रासवक्रोक्त्या मध्याधीरा दहेद्रुषा।
धीराधीरा तु रुदितैरधीरा परुषोक्तिभिः।

तत्र मध्याधीरा। यथा।

"तदविनयमवादीर्यन्मम त्वं प्रियेति
प्रियजनपरिभुक्तं यद् दुकुलं दधानः।
मदधिवसतिमागाः कामिनां मण्डनश्री-
र्व्रजति हि सफलत्वं वल्लभालोकनेन" ॥

मध्यैव धीराधीरा। यथा।

"बाले नाथ विमुञ्च मानिनि रुषं रोषान्मया किं कृतं
खेदोऽस्यास्तु न मेऽपराध्यति भवान् सर्वेऽपराधा मयि।
तत् किं रोदिषि गद्गदेन वचसा कस्याग्रतो रुद्यते
नन्वेतन्मम का तवास्मि दयिता नास्मीत्यतो रुद्यते"।

द्वयमेवाधीरा। यथा।

"सार्द्धं मनोरथशतैस्तव धूर्त्त कान्ता
सैव स्थिता मनसि कृत्रिमहावरस्या।
अस्माकमस्ति न च कश्चिदिहावकाश-
स्तस्मात् कृतं चरणपातविडम्बनाभिः" ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१०४ प्रगल्भा यदि धीरा स्याच्छन्नकोपाकृतिस्तदा॥
उदास्ते सुरते तत्र दर्शयन्त्यादरान् वहिः ।

तत्र प्रिये । यथा ।

"एकत्रासनसंस्थितिः परिहृता प्रत्यङ्गमाद् दूरतम्
ताम्बूलानयनच्छलेन रभसाऽऽश्लेषोऽपि संविघ्नितः ।
आलापोऽपि न मिश्रितः परिजनं व्यापारयन्त्याऽन्ति-
के कान्तं प्रत्युपचारतश्चतुरया कोपः कृतार्थीकृतः"॥

१०५, धीराधीरा तु सोल्लुण्ठभाषितैः खेदयेदमुम्॥

अमुं नायकम् । यथा मम ।

"अनलङ्कृतोऽपि सुन्दर हरसि मनो मे यतः प्रसभम् ।
किं पुनरलङ्कृतस्त्वं संप्रति नखरक्षतैस्तस्याः" ॥

१०६, तर्ज्जयेत्ताड़येदन्या

अन्या अधीरा । यथा "शोणं वीक्ष्य मुखम्" इत्यत्रैव ।
अत्र च सर्व्वत्र रुषेत्यनुवर्त्तते ।

१०७, प्रत्येकं ता अपि द्विधा ।
कनिष्ठज्येष्ठरूपत्वान्नायकप्रणयं प्रति ॥

ता अनन्तरोक्ताः षड्भेदा नायिकाः यथा ।

"दृष्ट्वैकासनसंस्थिते प्रियतमे पश्चादुपेत्यादरा-
देकस्या नयने पिधाय विहितक्रीडानुबन्धच्छलः ।
ईषद्वक्रितकन्धरः सपुलकः प्रेम्णोल्लसन्मानसाम्
अन्तर्हासलसत्कपोलफलकां धूर्त्तोऽपरां चुम्बति" ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१०८,
मध्याप्रगल्भयोर्भेदास्तस्माद्द्वादश कीर्त्तिताः ।
मुग्धा त्वेकैव तेन स्युः स्वीयाभेदास्त्रयोदश॥
परकीया द्विधा प्रोक्ता परोढा कन्यका तथा।

तत्र ।

१०९, यात्रादिनिरताऽन्योढा कुलटा गलितत्रपा॥

यथा ।

"स्वामी निश्वसितेऽप्यसूयति मनोजिघ्रः सपत्नीजनः
श्वश्रूरिङ्गितदैवतं नयनयोरीहालिहो यातरः ।
तद्दूरादयमञ्जलिः किमधुना दृग्भङ्गिभावेन ते
वैदग्धीमधुर प्रबन्धरसिक व्यर्थोऽयमत्र श्रमः" ॥

अत्र हि मम परिणेताऽन्नाच्छादनादिदातृतया स्वाम्येव न तु वल्लभः । त्वन्तु वैदग्धीमधुरप्रबन्धरसिकतया मम वल्लभोऽसीत्यादिव्यङ्ग्यार्थवशादस्याः परनायकविषया रतिः प्रतीयते ॥

११० कन्या त्वजातोपयमा सलज्जा नवयौवना ।

अस्याश्च पित्राद्यायत्तत्वात् परकीयात्वम्। यथा मालती-माधवादौ मालत्यादिः ॥

१११,
धीराकलाप्रगल्भास्याद्वेश्या सामान्यनायिका ॥
निर्गुणानपि न द्वेष्टि न रज्यति गुणिष्वपि।
वित्तमात्रं समालोक्य सा रागं दर्शयेद् बहिः॥
काममङ्गीकृतमपि परिक्षीणधनं नरम् ।
मात्रानिष्क्रामयेदेषा पुनःसन्धानकाङ्क्षया॥
तस्कराः पराङ्गका मूर्खाः सुखप्राप्तधनास्तथा।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लिङ्गिनश्छन्नकामाद्याआसांप्रायेण वल्लभाः॥
एषापि मदनायत्ता क्वापि सत्यानुरागिणी ।
रक्तायां वा विरक्तायां रतमस्यां सुदुर्लभम्॥

पण्ड्रको वातरोगपण्ड्रादिः।छन्नं प्रच्छन्नं ये कामयन्ते ते छन्नकामाः॥ तत्र रागहीना यथा नटकमेलकादौ मदनमञ्जर्य्यादिः॥ रक्ता। यथा मृच्छकटिकादौ वसन्तसेनादिः॥ पुनश्च।

११२, अवस्थाभिर्भवन्त्यष्टावेताः षोडशभेदिताः।
स्वाधीनभर्त्तृकातद्वत्खण्डिताऽथाभिसारिका॥
कलहान्तरिता विप्रलब्धा प्रोषितभर्त्तृका ।
अन्या वासकसज्ज्ञाख्याद्विरहोत्कण्ठिता तथा॥

तत्र।

११३, कान्तो रतिगुणाकृष्टो न जहाति यदन्तिकं।
विचित्रविभ्रमासक्ता सा स्यात् स्वाधीनभर्त्तृका॥

यथा "अस्माकं सखि वाससी" इत्यादि॥

११४, पार्श्वमेति प्रियो यस्या अन्यसम्भोगचिह्नितः।
सा खण्डितेति कथिता धीरैरीर्ष्याकषायिता॥

यथा "तदवितथमवादीरित्यादि"॥

११५, अभिसारयते कान्तं या मन्मथवशंवदा।
स्वयं वाऽभिसरत्येषा धीरैरुक्ताऽभिसारिका॥

क्रमाद् यथा।

"न च मेऽवगच्छति यथा लघुतां-
करुणां यथा च कुरुते स मयि।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निपुणं तथैनमवगम्य वदे
दभिदूति काचिदिति संदिदिशे" ॥
"उत्क्षिप्तं करकङ्कणद्वयमिदं बद्धा दृढं मेखला
यत्नेन प्रतिपादिता मुखरयोर्मञ्जीरयोर्मूकता ।
आरब्धे रभसान्मया प्रियसखि क्रीडाभिसारोत्सवे
चण्डालस्तिमिरावगुण्ठनपटक्षेपं विधत्ते विधुः" ॥

११६, संलीना स्वेषु गात्रेषु मूकीकृतविभूषणा ।
अवगुण्ठनसंवीता कुलजाऽभिसरेद्यदि ।
विचित्रोज्ज्वलवेशा तु वलन्नूपुरनिस्वना ।
प्रमोदस्मेरवदना स्याद्वेश्याऽभिसरेद्यदि ॥
मदस्खलितसंलापा विभ्रमोत्फुल्ललोचना ।
आविद्धगतिसञ्चारा स्यात् प्रेष्याऽभिसरेद्यदि॥

तत्राद्ये "उत्क्षिप्तमित्यादि"*। अन्ययोरुच्चमुदाहरणम्॥

प्रसङ्गादभिसारस्थानानि कथ्यन्ते ॥

११७, क्षेत्रं वाटी भग्नदेवालयो दूतीगृहं वनम् ।
आलयञ्च श्मशानञ्च नद्यादीनां तटी तथा ॥
एवं कृताभिसाराणां पुञ्चलीनां विनोदने ।

---

*तत्र यथा प्रेष्याभिसारिका ।
"ताम्बूलाक्तं दशनमसकृद् दर्शयन्तीह चेटी
घोटी ह्येषाविकृतविरुतं हेतुहीनं हसन्ती ।
स्थानस्थानस्खलितपदविन्यासमाभाषमाना
यूनामग्रे वसति कुटिलं नर्त्तितोच्चैर्नितम्बम् ॥"
आदृतपूर्वोऽप्येष पाठः प्रकृतानुपयोगित्वादधः कृतः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्थानान्यष्टौ तथा ध्वान्तछन्नेषु क्वचिदाश्रयः॥
चाटुकारमपि प्राणनाथं रोषादपास्य या।
पश्चात्तापमवाप्नोति कलहान्तरिता तु सा॥

यथा मम तातपादानाम्।

"नो चाटुश्रवणं कृतं न च दृशा हारोऽन्तिके वीक्षितः
कान्तस्य प्रियहेतवे निजसखीवाचोऽपि दूरीकृताः।
पादान्ते विनिपत्य तत्क्षणमसौ गच्छन्मया मूढया।
पाणिभ्यामवरुध्य हन्त सहसा कण्ठे कथं नार्पितः"॥

११८, प्रियःकृत्वापि सङ्केतं यस्या नायाति सन्निधिम्।
विप्रलब्धा तु सा ज्ञेया नितान्तमवमानिता॥

यथा।

"उत्तिष्ठ दूति यामो यामो यातस्तथापि नायातः।
याऽतः परमपि जीवेज्जीवितनाथो भवेत् तस्याः"॥

११९, नानाकार्य्यवशाद् यस्या दूरदेशं गतः पतिः।
सा मनोभवदुःखार्त्ता भवेत् प्रोषितभर्तृका॥

यथा।

"ताम्रानीयाः परिमितकथाञ्जीवितं मे द्वितीयं
दूरीभूते मयि सहचरे चक्रवाकीमिवैकाम्।
गाढोत्कण्ठां गुरुषु दिवसेष्वेषु गच्छत्सु बालां
जातां मन्ये शिशिरमथितां पद्मिनीं वान्यरूपाम्"॥

१२०, कुरुते मण्डनं यस्याः सज्जिते वासवेश्मनि।
सा तु वासकसज्जा स्याद्विदितप्रियसङ्गमा॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यथा राघवानन्दानां नाटके ।

"विदूरे केयूरे कुरु करयुगे रत्नवलयै-
रलं गुर्वी ग्रीवाभरणलतिकेयं किमनया ।
नवामेकामेकावलिमयि मयि त्वं विरचये-
र्न पथ्यं नेपथ्यं वज्रतरमनङ्गोत्सवविधौ" ॥

१२१ आगन्तुं कृतचित्तोऽपि दैवान्नायातिप्रियः ।
तदनागमदुःखार्त्ता विरहोत्कण्ठिता तु सा ॥

यथा ।

"किं रुद्धः प्रियया कयाचिदथवा सख्या समोद्वेजितः
किं वा कारणगौरवं किमपि यन्नाद्यागतो वल्लभः ।
इत्यालोच्य मृगीदृशा करतले विन्यस्य वक्त्राम्बुजं
दीर्घं निश्वसितं चिरं च रुदितं चिम्लाश्च पुष्पस्रजः" ॥

१२२
इति साष्टाविंशतिशतमुत्तममध्यमाधमस्वरूपतः
चतुरधिकाशीतियुतंशतत्रयं नायिकाभेदानां स्यात्

इह च "परस्त्रियौ कन्यकोढे सङ्केतात् पूर्वं विरहोत्-
कण्ठिते पश्चाद्विदूषकादिना सहाभिसरन्त्यावभिसारिके
कुतोऽपि सङ्केतितस्थानमप्राप्ते नायके विप्रलब्धे इति
त्रयवस्थैवानयोरस्वाधीनप्रिययोरवस्थान्तरायोगादिति
कश्चित्" ॥

१२३ क्वचिदन्योन्यसाङ्कर्य्यमासांलक्ष्येषु दृश्यते ।

यथा ।

"नखलुवयमसुष्यदानयोग्याःपिबतिचमातिचयास्कौरहस्वां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वटविटपमसुं ददस्वतस्यै भवति यतः सदृशोश्चिराययोगः॥
तव कितव किमाहितैर्वृथा नः क्षितिरुहपल्लवपुष्पकर्णपूरैः।
ननु जनविदितैर्भवद्व्यलीकैश्चिरपरिपूरितमेव कर्णयुग्मम् ॥
इति गदितवती रुषा जघान स्फुरितमनोरमपक्ष्मकेसरेण ।
श्रवणनियमितेनकान्तमन्या समसमसिताम्बुरुहेणचक्षुषा च"॥

इयं हि वक्रोक्त्या परुषवचनेन कर्णोत्पलताड़नेन च धीरमध्यताऽधीरमध्यताऽधीरप्रगल्भताभिः सङ्कीर्णा । एवमन्यत्राप्यूह्यम् ।

१२४इतरा अप्यसङ्ख्यास्ता नोक्ता विस्तरशङ्कया ।

ता नायिकाः ॥ अथासामलङ्काराः ।

१२५,यौवनेसत्त्वजास्तासामष्टाविंशतिसङ्ख्यकाः॥
अलङ्कारास्तत्र भावहावहेलास्त्रयोऽङ्गजाः ।
शोभा कान्तिश्च दीप्तिश्च माधुर्य्यञ्च प्रगल्भता॥
औदार्य्यं धैर्य्यमित्येते सप्तैव स्युरयत्नजाः ।
लीलाविलासौ विच्छित्तिर्विव्वोकः किलकिञ्चितं।
मोट्टायितं कुट्टमितं विभ्रमो ललितं मदः ॥
विक्रतं तपनं मौग्धं विक्षेपश्च कुतूहलम् ।
हसितं चकितं केलिरित्यष्टादशसङ्ख्यकाः ॥
स्वभावजाश्च भावाद्या दश पुंसां भवन्त्यपि ।

पूर्वे भावादयो धैर्य्यान्ता दश नायकानामपि सम्भवन्ति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

किन्तु सर्वेऽप्यमी नायिकाश्रिता एव विच्छित्तिविशेषं पुष्णन्ति । तत्र भावः ।

१२६, निर्विकारात्मके चित्तेभावः प्रथमविक्रिया ॥

जन्मतः प्रभृति निर्विकारे मनसि उद्बुद्धमात्रो विकारो भावः । यथा ।

"स एव सुरभिः कालः स एव मलयानिलः ।
सैवेयमबला किन्तु मनोऽन्यदिव दृश्यते" ॥

अथ हावः ॥

१२७, भ्रुनेत्रादिविकारैस्तु सम्भोगेच्छाप्रकाशकः
भाव एवाल्पसंलक्ष्यविकारो हाव उच्यते ॥

यथा ।

"विवृण्वती शैलसुताऽपि भावमङ्गैः क्वचिद्बालकदम्बकल्पैः ।
साचीकृता चारुतरेण तस्थौ मुखेन पर्य्यस्तविलोचनेन" ॥

अथ हेला ।

१२८ हेलात्यन्तं समालक्ष्यविकारःस्यात् स एव च ।

स एव भाव एव । यथा ॥

"तह से झत्ति पउत्ता वज्जए सव्वङ्गविब्भमा सअला ।
संसइअसुद्धभावा होइ चिरं जह सहीणम्पि" *॥

---

* तहसे इति । तथा तस्या झटिति प्रवृत्ता वध्वाः सर्वाङ्गविभ्रमाः सकलाः । संशयितमुग्धभावा भवति चिरं यथा सखीनामपि ॥ इति । सं० टी० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१२९, रूपयौवनलालित्यभोगाद्यैरङ्गभूषणम् ॥
शोभा प्रोक्ता

तत्र यौवनशोभा यथा ।

"असम्भृतं मण्डनमङ्गयष्टेरनासवाख्यं करणं मदस्य ।
कामस्य पुष्पव्यतिरिक्तमस्त्रं बाल्यात्परं साधु वयः प्रपेदे" ॥

एवमन्यत्रापि ॥ अथ कान्तिः ।

१३०, सैव कान्तिर्मन्मथाप्यायिता द्युतिः ।

मन्मथोन्मेषणातिविस्तीर्णशोभैव कान्तिरुच्यते । यथा ।

"नेत्रे खञ्जनगञ्जने इत्यादि" ॥ अथ दीप्तिः ।

१३१,
कान्तिरेवातिविस्तीर्णादीप्तिरित्यभिधीयते ॥

यथा मम चन्द्रकलानामनाटिकायां चन्द्रकलावर्णनम् ॥

"तारुण्यस्य विलासः समधिकलावण्यसम्पदो हासः ।
धरणितलस्याभरणं युवजनमनसो वशीकरणम्" ॥

अथ माधुर्य्यम् ।

१३२सर्वावस्थाविशेषेषु माधुर्यं रमणीयता ।

यथा ।

"सरसिजमनुविद्धं शैवलेनापि रम्यं
मलिनमपि हिमांशोर्लक्ष्म लक्ष्मीं तनोति ।
इयमधिकमनोज्ञा वल्कलेनापि तन्वी
किमिव हि मधुराणां मण्डनं नाकृतीनाम्" ॥

अथ प्रगल्भा ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१३३, निःसाध्वसत्वं प्रागल्भम्

यथा ।

"समाश्लिष्टाः समाश्लेषैश्चुम्बिताश्चुम्बनैरपि ।
दष्टाश्च दंशनैः कान्तं दासीकुर्व्वन्ति योषितः" ॥

अथौदार्य्यम् ।

१३४, औदार्य्यं विनयः सदा ॥

"न ब्रूते पुरुषां गिरं वितनुते न भ्रूयुगं भङ्गुरं
नोत्तंसं क्षिपति क्षितौ श्रवणतः सा मे स्फुटेऽप्यागसि ।
कान्ता गर्भगृहे गवाक्षविवरव्यापारिताक्ष्या बहिः
सख्या वक्त्रमभिप्रयच्छति परं पर्य्यश्रुणी लोचने" ॥

अथ धैर्य्यम् ।

१३५, मुक्तात्मश्लाघना धैर्य्यं मनोवृत्तिरचञ्चला।

यथा ।

"ज्वलतु गगने रात्रौ रात्रावखण्डकलः शशी
दहतु मदनः किं वा मृत्यो परेण विधास्यति ।
मम तु दयितः श्लाघ्यस्तातो जनन्यमलान्वया
कुलममलिनं न त्वेवायं जनो न च जीवितम्" ॥

अथ लीला ।

१३६, अङ्गैर्वेशैरलङ्कारैः प्रेमभिर्व्वचनैरपि ॥
प्रीतिप्रयोजितैर्लीलां प्रियस्यानुकृतिं विदुः ।

यथा ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

"मृणालव्यालवलया वेणीबन्धकपर्दिनी।
हरानुकारिणी पातु लीलया पार्व्वती जगत्" ॥

अथ विलासः।

[१]३७, यानस्थानासनादीनां मुखनेत्रादिकर्मणां॥
विशेषस्तु विलासः स्यादिष्टमन्दर्शनादिना।

यथा।

"अत्रान्तरे किमपि वाग्विभवातिवृत्त-
वैचित्र्यमुल्लसितविभ्रममायताक्ष्याः।
तद्भूरिसात्त्विकविकारमपास्तधैर्य्यम्
आचार्य्यकं विजयि मान्मथमाविरासीत्" ॥

अथ विच्छित्तिः।

[१३८]
स्तोकाऽप्याकल्परचनाविच्छित्तिःकांतिपोषकृत्॥

यथा।

"स्वच्छाम्भःस्नपनविधौ तमङ्गमोष्ठ-
स्ताम्बूलद्युतिविशदो विलासिनीनाम्।
वाससु प्रतनुविविक्तमस्त्रिनीयान्
आकल्पो यदि कुसुमेषुणा न शून्यः" ॥

अथ विव्वोकः।

१३९ विव्वोकस्त्वतिगर्व्वेण वस्तुनीष्टेऽप्यनादरः।

यथा।

"यासां सत्यपि सङ्गुणानुसरणे दोषानुवृत्तिः परा
याः प्राणान् वरमर्पयन्ति न पुनः संपूर्णदृष्टिं प्रिये।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अत्यन्ताभिमतेऽपि वस्तुनि विधिर्यासां निषेधात्मक-
स्तास्त्रैलोक्यविलक्षणप्रकृतयो वामाः प्रसीदन्तु ते" ॥

अथ किलकिञ्चितम्।

१४०, स्मितशुष्करुदितहसितत्रासक्रोधश्रमादीनां
सांकर्य्यं किलकिंचितमभीष्टतमसङ्गमादिजाद्धर्षात्

यथा।

"पाणिरोधमविरोधितयाञ्चं भर्त्सनाश्च मधुरस्मितगर्भाः।
कामिनः स्म कुरुते करभोरूर्हारिशुष्करुदितञ्च सुखेऽपि"॥

अथ मोट्टायितम्।

१४१, तद्भावभाविते चित्ते वल्लभस्य कथादिषु ॥
मोट्टायितमिति प्राज्ञः कर्णकण्डूयनादिकम्।

यथा।

"सुभग त्वत्कथारम्भे कर्णकण्डूतिलालसा।
उज्जृम्भवदनाम्भोजा भिनत्त्यङ्गानि साङ्गना" ॥

अथ कुट्टमितम्।

१४२, केशस्तनाधरादीनां ग्रहे हर्षेऽपि संभ्रमात्॥
प्राज्ञः कुट्टमितं नाम शिरःकरविधूननम्।

यथा।

"पल्लवोपमितसाम्यसपत्नं दृष्टवत्यधरबिम्बसभीष्टे।
पर्य्यकूजि सरुजेवतरुण्यास्तारलोलवलयेन करेण" ॥

अथ विब्बोकः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१४३,त्वरया हर्षरागाद्दैर्दयितागमनादिषु ॥
अस्थाने भूषणादीनां विन्यासो विभ्रमो मतः।

"श्रुत्वाऽऽयान्तं वहिः कान्तमसमाप्तविभूषया ।
भालेऽञ्जनं दृशोर्लाक्षा कपोले तिलकः कृतः" ॥

अथ ललितम् ।

१४४,सुकुमारतयाऽङ्गनां विन्यासो ललितंभवेत्

यथा ।

"गुरुतरकलनूपुरानुनादं सललितनर्त्तितवामपादपद्मा ।
इतरदनतिलोलमादधाना पदमथ मन्मथमन्थरं जगाम"॥

अथ मदः ।

१४५,मदो विकारः सौभाग्ययौवनाद्यवलेपजः ॥

यथा ।

"मा गर्व्वमुद्वह कपोलतले चकास्ति
कान्तस्वहस्तलिखिता मम मञ्जरीति ।
अन्याऽपि किं न खलु भाजनमीदृशीनां
वैरी न चेद्भवति वेपथुरन्तरायः" ॥

अथ विक्लवम् ।

१४६,वक्तव्यकालेऽप्यवचो व्रीडया विक्लवं मतम् ।

यथा ।

"दूरागतेन कुशलं पृष्टा नोवाच सां मया किञ्चित् ।
पर्य्यश्रुणी तु यनने तस्याः कथयाम्बभूवतुः सर्वम्" ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ तपनम् ।

१४७, तपनं प्रियविच्छेदे स्मरावेशोत्थचेष्टितम् ॥

यथा मम ।

"श्वासान्मुञ्चति भूतले विलुठति त्वन्मार्गमालोकते
दीर्घं रोदिति विक्षिपत्यत इतः क्षामां भुजावल्लरीम् ।
किञ्च प्राणसमा न काङ्क्षितवती स्वप्नेऽपि ते सङ्गमम्
निद्रां वाञ्छति न प्रयच्छति पुनर्दग्धो विधिस्तामपि" ॥

अथ मौग्ध्यम् ।

१४८, अज्ञानादिव या पृच्छा प्रतीतस्यापि वस्तुनः ।
वल्लभस्य पुरः प्रोक्तं मौग्ध्यं तत्तत्त्ववेदिभिः ॥

यथा ।

"के द्रुमास्ते क्व वा ग्रामे सन्ति केन प्ररोपिताः ।
नाथ मत्कङ्कणन्यस्तं येषां मुक्ताफलं फलम्" ॥

अथ विक्षेपः ।

१४९, भूषाणामङ्गरचना वृथा विष्वगवेक्षणम् ।
रहस्याख्यानमीषच्च विक्षेपो दयितान्तिके ॥

यथा ।

"धम्मिल्लमङ्गमुक्तं कलयति तिलकं तथा सकलम् ।
किञ्चिद्वदति रहस्यं चकितं विष्वगवलोकते तन्वी" ॥

अथ कुतूहलम् ।

१५०, रम्यवस्तुसमालोके लोलता स्यात् कुतूहलम् ।

यथा ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

"प्रसाधिकालम्बितमग्रपादमाक्षिप्य काचिद्द्रुतरागमेव ।
उत्सृष्टलीलागतिरागवाचालं लक्षकाञ्चीं पदवीं ततान" ॥

अथ हसितम् ।

१५१, हसितन्तु वृथाहासो यौवनोद्भेदसम्भवः ।

यथा ।

"अकस्मादेव तन्वङ्गी जहास यदियं पुनः ।
नूनं प्रसूनबाणोऽस्यां स्वाराज्यमधितिष्ठति" ॥

अथ चकितम् ।

१५३, कुतोऽपि दयितस्याग्रे चकितं भयसम्भ्रमः ।

यथा ।

"त्रस्यन्ती चलशफरीघट्टितोरू-
र्वामोरूरतिशयमाप विभ्रमस्य ।
क्षुभ्यन्ति प्रसभमहो विनाऽपि हेतो-
र्लीलाभिः किमु सति कारणे तरुण्यः" ॥

अथ केलिः ।

१५२, विहारे सह कान्तेन क्रीड़ितं केलिरुच्यते॥

यथा ।

"व्यपोहितुं लोचनतो मुखानिलै-
रपारयन्तं किल पुष्पजं रजः ।
पयोधरेणोरसि काचिदुन्मना:
प्रियं जघानोन्नतपीवरस्तनी" ॥

अथ मुग्धाकन्ययोरनुरागेङ्गितानि ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१५४, दृष्टा दर्शयति व्रीडां सम्मुखं नैव पश्यति ।
प्रच्छन्नं वा भ्रमन्तं वाऽतिक्रान्तं पश्यति प्रियम् ॥
बहुधा पृच्छ्यमानाऽपि मन्दमन्दमधोमुखी ।
सगद्गदस्वरं किञ्चित् प्रियं प्रायेण भाषते ॥
अन्यैः प्रवर्त्तितां शश्वत् सावधाना च तत्कथाम् ।
शृणोत्यन्यत्र दत्ताक्षी प्रिये बालानुरागिणी ॥

अथ सकलानामपि नायिकानामनुरागेङ्गितानि ।

१५५, चिराय सविधे स्थानं प्रियस्य बहु मन्यते ।
विलोचनपथच्छाय न गच्छत्यनलङ्कृता ॥
कापि कुन्तलसंव्यानसंयमव्यपदेशतः ।
बाहुमूलं स्तनौ नाभिपङ्कजं दर्शयेत् स्फुटम् ॥
आच्छादयति वागाद्यैः प्रियस्य परिचारकान् ।
विश्वसित्यस्य मित्रेषु बहु मानं करोति च ॥
सखीमध्ये गुणान् ब्रूते स्वधनं प्रददाति च ।
सुप्ते स्वपिति दुःखेस्य दुःखं धत्ते सुखे सुखम् ॥
स्थिता दृष्टिपथे शश्वत् प्रिये पश्यति दूरतः ।
आभाषते परिजनं सम्मुखे स्मरविक्रियम् ॥
यत्किञ्चिदपि संवाच्य कुरुते हसितं मुधा ।
कर्णकण्डूयनं तद्वत् कबरीमोक्षसंयमौ ॥
जृम्भते स्फोटयत्यङ्गं बालमाश्लिष्य चुम्बति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

माले तथा वयस्याया आरभेत्तिलकक्रियाम् ॥
अङ्गुष्ठाग्रेण लिखति सकटाक्षं निरीक्षते।
दशति स्वाधरं चाऽपि ब्रूते प्रियमधोमुखी ॥
न मुञ्चति च तं देशं नायको यत्र दृश्यते।
आगच्छति गृहं चास्य कार्य्यव्याजेन केनचित् ॥
दत्तं किमपि कान्तेन धृत्वाङ्के मुञ्जरीक्षते।
नित्यं हृष्यति तद्योगे वियोगे मलिना कृशा ॥
मन्यते बहु तच्छीलं तत्प्रियं मन्यते प्रियम्।
प्रार्थयत्यल्पमूल्यानि सुप्ता न परिवर्त्तते ॥
विकारान् सात्त्विकानस्य सम्मुखी नाधिगच्छति।
भाषते ह्यनृतं स्निग्धमनुरक्ता नितम्बिनी ॥
एतेष्वधिकलज्जानि चेष्टितानि नवस्त्रियाः।
मध्यव्रीडानि मध्यायाः स्वंसमानलपाणि तु ॥
अन्यस्त्रियाः प्रगल्भायास्तथा स्युर्वारयोषितः ॥

दिङ्मात्रं यथा मम।

"अन्तिकगतमपि मामियमलोकयतीव हन्त दृष्ट्वापि।
सरसनखक्षतमण्डितमाविष्कुरुते भुजामूलम् ॥

तथा।

१५६, लेख्यप्रस्थापनैः स्निग्धैर्वीक्षितैर्मृदुभाषितैः।
दूतीसंप्रेषणैर्नार्य्या भावाभिव्यक्तिरिष्यते ॥

दूत्यश्च।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(१५७)
दूत्यः सखी नटी दासी धात्रेयी प्रतिवेशिनी ।
बाला प्रव्रजिता कारुः शिल्पिन्याद्याः स्वयं तथा॥

कारु रजकीप्रभृतिः । शिल्पिनी चित्रकारादिस्त्री । आदिशब्दात्ताम्बूलिकगान्धिकस्त्रीप्रभृतयः॥ तत्र सखी यथा । "ग्रासान्मुञ्चतीत्यादि" । स्वयं दूती यथा मम ।
"पन्थिअ पिआसिओ विअ लक्खीअसि जासि ता किमसत्तो।
ण मणं बिवारओ दूधअत्थि घरे घनरसं पिअन्ताणं"* ॥

एताश्च नायिकाविषये नायकानामपि दूत्यो भवन्ति ॥

दूतीगुणानाह ।

१५८, कलाकौशलमुत्साहोभक्तिश्चित्तज्ञता स्मृतिः
माधुर्य्यं नर्मविज्ञानं वाग्मिता चेति तद्गुणाः ॥

एता अपि यथौचित्यादुत्तमाधममध्यमाः ।

एता दूत्यः ॥ अथ प्रतिनायकः ।

१५९, धीरोद्धतः पापकारी व्यसनी प्रतिनायकः॥

यथा रामस्य रावणः ॥ अथोद्दीपनविभावाः ।

१६०, उद्दीपनविभावास्ते रसमुद्दीपयन्ति ये ।

ते च ।

१६१, आलम्बनस्य चेष्टाद्या देशकालादयस्तथा॥

---

* पन्थिअ इति । पान्थ पिपासित इव लक्ष्यसे यासि तत् किमन्यत्र । न मनागपि वारक इहास्ति गृहे घनरसं पिबताम् ॥ इति सं टी० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चेष्टादीत्यादिशब्दाद्रूपभूषणादयः। कालादीत्यादिशब्दाच्चन्द्रचन्दनकोकिलालापभ्रमरझङ्कारादयः॥

तत्र चन्द्रो यथा मम।

"करमुदयमहीधरस्तनाग्रे गलिततमःपटलांशुके निवेश्य।
विकसितकुमुदेक्षणं विचुम्बत्ययममरेशदिशोमुखं सुधांशुः"॥

यो यस्य रसस्य उद्दीपनविभावः स तत्स्वरूपवर्णनेवक्ष्यते।

अथानुभावाः।

१६२,
उद्बुद्धं कारणैः स्वैः स्वैर्बहिर्भावं प्रकाशयन्।
लोके यः कार्यरूपः सोऽनुभावः काव्यनाट्ययोः॥

यः खलु लोके सीतादिचन्द्रादिभिः स्वैः स्वैरालम्बनोद्दीपनकारणैर्रामादेरन्तरुद्बुद्धं रत्यादिकं बहिः प्रकाशयन् कार्यमित्युच्यते स काव्यनाट्ययोः पुनरनुभावः। कः पुनरसावित्याह।

१६३,
उक्ताः स्त्रीणामलङ्कारा अङ्गजाश्च स्वभावजाः।
तद्रूपाः सात्त्विका भावास्तथा चेष्टाः परा अपि॥

तद्रूपा अनुभावस्वरूपाः। तत्र च यो यस्य रसस्यानुभावः स तत्स्वरूपवर्णने वक्ष्यते। तत्र सात्त्विकाः।

१६४,
विकाराःसत्त्वसम्भूताःसात्त्विकाःपरीकिर्त्तिताः।

सत्त्वं नाम स्वात्मविश्रामप्रकाशकारी कश्चनाऽऽन्तरो धर्म्मः।

१६५, सत्त्वमात्रोद्भवत्वात्ते भिन्ना अप्यनुभावतः॥

गोबलीवर्दन्यायेन इति शेषः। के ते इत्याह।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१६६, स्तम्भः स्वेदोऽथ रोमाञ्चः स्वरभङ्गोऽथ वेपथुः ।
वैवर्ण्यमश्रु प्रलय इत्यष्टौ सात्त्विकाः स्मृताः ॥

तत्र ।

१६७, स्तम्भश्चेष्टाप्रतिघातो भयहर्षामयादिभिः ।
वपुर्जलोद्गमः स्वेदो रतिघर्मश्रमादिभिः ॥
हर्षाद्भुतभयादय्यो रोमाञ्चो रोमविक्रिया ।
मदसंमदपीडाद्यैर्वैस्वर्यं गद्गदं विदुः ॥
रागद्वेषश्रमादिभ्यः कम्पो गात्रस्य वेपथुः ।
विषादमदरोषाद्यैर्वर्णान्यत्वं विवर्णता ॥
अश्रु नेत्रोद्भवं वारि क्रोधदुःखप्रहर्षजम् ।
प्रलयः सुखदुःखाभ्यां चेष्टाज्ञाननिराकृतिः ॥

यथा मम ।

"तनुस्पर्शादस्या दरमुकुलिते हन्त नयने
उदञ्चद्रोमाञ्चं व्रजति जडतामङ्गमखिलम् ।
कपोलौ घर्माद्रौ ध्रुवमुपरताशेषविषयं
मनः सान्द्रानन्दं स्पृशति झटिति ब्रह्म परमम्" ॥

एवमन्यत् । अथ व्यभिचारिणः ।

१६८, विशेषादाभिमुख्येन चरन्तो व्यभिचारिणः ।
स्थायिन्युन्मग्ननिर्मग्नास्त्रयस्त्रिंशच्च तद्भिदाः ॥

स्थिरतया वर्त्तमाने हि रत्यादौ निर्वेदादयः प्रादु-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भावतिरोभावाभ्यामाभिमुख्येन चरणाद्व्यभिचारिणः कथ्यन्ते ॥ के ते इत्याह ।

१६९, निर्वेदावेगदैन्यश्रममदजडता औग्र्यमौहौ विबोधः स्वप्नापस्मारगर्वामरणमलसतामर्षनिद्रावहित्थाः। औत्सुक्योन्मादशङ्काः स्मृतिमतिसहिताव्याधिसन्त्रासलज्जा हर्षासूयाविषादाः सधृतिचपलताग्लानिचिन्तावितर्काः ॥

तत्र निर्वेदः ।

१७०,
तत्त्वज्ञाना*पदीर्ष्यादे† निर्वेदः स्वावमानना ।
दैन्यचिन्ताश्रुनिश्वासववर्ण्योच्छ्वसितादि*कृत् ॥

तत्र तत्त्वज्ञानान्निर्वेदो यथा ।

"मृत्कुम्भवालुकाग्न्यपिधानरचनार्थिना ।
दक्षिणावर्त्तशङ्खोऽयं हन्त चूर्णीकृतो मया" ।

१७१, आवेगः सम्भ्रमस्तत्र वर्षजे पीडिताङ्गता ।
उत्पातजे स्तम्भनाङ्गे धूमाद्याकुलताग्निजे ॥
राजविद्रवजादेस्तु शस्त्रनागादियोजनम् ।
गजादेः स्तम्भकम्पादिः पांश्वाद्याकुलतानिलात् ॥
दृष्टाद्वर्षाः शुचोऽनिष्टाज्ज्ञेयाश्चान्ये यथायथम् ।

---

*तत्त्वज्ञानमिह देहविषयादावनुपादः यत्तज्ज्ञानमेव न तु जीवात्मपरमात्मनोरभेदज्ञानं तस्मिन् सति मोक्ष एव न तु स्वावमाननम्॥ टी०॥

† आदिपदात् पुराणश्रवणादीनां ग्रहः ॥ टी० ॥

* आदिपदात् स्वस्य कुकर्मोद्भावनादीनां ग्रहणम् ॥ टी० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्र शत्रुजो यथा ।

"अर्घत्रमर्घत्रमिति वादिनं नृपं सोऽनवेक्ष्य भरताग्रजो यतः
चक्रकोपदहनार्चिषं ततः सन्दधे दृशमुदग्रतारकाम्"।।

एवमन्यदूह्यम् । अथ दैन्यम् ।

१७२, दौर्गत्याद्यैरनौजस्यं दैन्यं मलिनतादिकृत्॥

यथा ।

"दृष्टोऽन्धः पतिरेष मञ्चकगतः स्थूणावशेषं गृहं
कालोऽथर्णजलागमः कुशलिनी वत्सस्य वार्त्तापि नो ।
यत्नात्सञ्चिततैलबिन्दुवटिका भग्नेति पर्य्याकुला
दृष्ट्वा गर्भभरालसां निजवधूं श्वश्रूश्चिरं रोदिति"।।

अथ श्रमः ।

१७३, खेदो रत्यध्वगत्यादेः श्वासनिद्रादिकृच्छ्रमः।

यथा ।

"सद्यःपुरीपरिसरे च शिरीषमृद्वी
गत्वा जवात् त्रिचतुराणि पदानि सीता ।
गन्तव्यमस्ति कियदित्यसकृद् ब्रुवाणा
रामाश्रुणः कृतवती प्रथमावतारम्"।।

अथ मदः ।

१७४, सम्मोहानन्दसम्भेदो मदो मद्योपयोगजः॥
अमुना चोत्तमः शेते मध्यो हसति गायति ।
अधमप्रकृतिश्चापि परुषं वक्ति रोदिति ॥

यथा ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

"प्रातिभं* त्रिरसकेण गतानां† वक्रवाक्यरचनारमणीयः।
गूढसूचितरहस्यसहासः सुभ्रुवां प्रवहते परिहासः"॥

अथ जडता ।

१७५,
अप्रतिपत्तिर्जडता स्यादिष्टानिष्टदर्शनश्रुतिभिः।
अनिमिषनयननिरीक्षणतूष्णींभावादयस्तत्र ॥

यथा मम कुवलयाश्वचरिते प्राकृतकाव्ये ।

"णवरिअ तं जुअजुअलं अन्नोन्नणिहिदसजलमच्चरदिट्ठिं।
आलक्खओपिअं बिअखण मेत्तं तत्थत्थिअं मुहसङ्गं"‡॥

अथोग्रता ।

१७६, शौर्यापराधादिभवं भवेच्चण्डत्वमुग्रता ।
तत्र स्वेदः शिरःकम्पतर्जनाताडनादयः ॥

यथा ।

"प्रणयिसखीसलीलपरिहासरसाधिगतै-
र्ललितशिरीषपुष्पहननैरपि ताम्यति यत् ।
वपुषि बधाय तत्र तव शस्त्रमुपक्षिपतः
पततु शिरस्यकाण्डयमदण्ड इवैष भुजः"॥

अथ मोहः ।

---

* प्रातिभं प्रागल्भ्यम् इति ॥ टी० ॥

† त्रिरसकेण मद्येनेति ॥ टी० ॥

‡ णवरिअ इति । केवलं तद् युवयुगलमन्योन्यनिहितसजलमन्यरदृष्टि । आलेख्यार्पितमिव क्षणमात्रं तत्र स्थितं मुक्तसङ्गमिति ॥ सं टी० ॥ णवरिअशब्दः केवलार्थोपदेशी ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१७७ मोहो विचित्तता भीतिदुःखावेगानुचिन्तनैः ।
घूर्णनागात्रपतनभ्रमणादर्शनादिकृत् ॥

यथा ।

"तीव्राभिषङ्गप्रभवेन वृत्तिं मोहेन संरुन्ध्यतेन्द्रियाणाम् ।
अज्ञातभर्त्तृव्यसना मुहूर्त्तं कृतोपकारेव रतिर्बभूव" ॥

अथ विबोधः ।

१७८, निद्रापगमहेतुभ्यो विबोधश्चेतनागमः ।
जृम्भाङ्गभङ्गनयनमीलनाङ्गावलोककृत् ॥

यथा ।

"चिररतिपरिखेदात् प्राप्तनिद्रासुखानां-
चरममपि शयित्वा पूर्व्वमेव प्रबुद्धाः ।
अपरिचलितगात्राः कुर्व्वते न प्रियाणा-
मशिथिलभुजचक्रा श्लेषभेदं तरुण्यः" ॥

अथ स्वप्नः ।

१७९, स्वप्नो निद्रामुपेतस्य विषयानुभवस्तु यः ।
कोपावेगभयग्लानिसुखदुःखादिकारकः ॥

यथा ।

"मामाकाशप्रणिहितभुजं निर्दयाश्लेषहेतो-
र्लब्धायास्ते कथमपि मया स्वप्नसन्दर्शनेन ।
पश्यन्तीनां न खलु बहुशो न स्थलीदेवतानां-
मुक्तास्थूलास्तरुकिशलयेष्वश्रुलेशाः पतन्ति" ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथापस्मारः ।

१८०, मनःक्षेपस्त्वपस्मारो ग्रहाद्यावेशनादिजः।
भूपातकम्पप्रस्वेदफेनलालादिकारकः ॥

यथा ।

"आश्लिष्टभूमिं रशितारमुच्चैर्ललद्भुजाकारबृहत्तरङ्गम्।
फेनायमानं प्रतिमापगानामसावपस्मारिणमाशशङ्के" ॥

अथ गर्वः ।

१८१, गर्वो मदः प्रभावश्रीविद्यासत्कुलतादिजः ।
अवज्ञासविलासाङ्गदर्शनाविनयादिकृत् ॥

यथा ।

"धृतायुधो यावदहं तावदन्यैः किमायुधैः ।
यद्वा न सिद्धमस्त्रेण मम तत् केन साध्यताम्" *॥

अथ मरणम् ।

१८२, शराद्यैर्म्मरणं जीवत्यागोऽङ्गपतनादिकृत् ।

यथा ।

"राममन्मथशरेण ताडिता दुःसहेन हृदये निशाचरी ।
गन्धवद्रुधिरचन्दनोक्षिता जीवितेशवसतिं जगाम सा" ॥

अथालस्यम् ।

१८३, आलस्यं श्रमगर्भाद्यैर्जाड्यं जृम्भासितादिकृत्॥

यथा ।

---

* यन्न सिद्धं ममस्त्रेण वद तत् केन साध्यते इत्युत्तरार्द्धस्य पाठान्तरः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

"न तथा भूषयत्यङ्गं न तथा भाषते सखीम् ।
जृम्भते मुञ्जरासीना बाला गर्भभरालसा" ॥

अथामर्षः ।

१८४, निन्दाक्षेपापमानादेरमर्षोऽभिनिविष्टता ।
नेत्ररागशिरःकम्पभ्रूभङ्गोत्तर्ज्जनादिकृत् ॥

यथा ।

"प्रायश्चित्तं चरिष्यामि पूज्यानां वो व्यतिक्रमात् ।
न त्वेवं दूषयिष्यामि शस्त्रग्रहमहाव्रतम्" ॥

अथ निद्रा ।

१८५, चेतःसम्मीलनं निद्रा श्रमक्लममदादिजम् ।
जृम्भाक्षिमीलनोच्छ्वासगात्रभङ्गादिकारणम् ॥

यथा ।

"सार्थकानर्थकपदं ब्रुवती मन्थराक्षरम् ।
निद्रार्द्धमीलिताक्षी सा लिखितेवास्ति मे हृदि" ॥

अथावहित्था ।

१८६, भयगौरवलज्जादेर्हर्षाद्याकारगुप्तिरवहित्था ।
व्यापारान्तरसत्यन्यथावभाषणविलोकनादिकरी ॥

यथा ।

"एवं वादिनि देवर्षौ पार्श्वे पितुरधोमुखी ।
लीलाकमलपत्राणि गणयामास पार्वती" ॥

अथौत्सुक्यम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१८७, इष्टानवाप्तेरौत्सुक्यं कालक्षेपासहिष्णुता।
चित्ततापत्वरास्वेददीर्घनिश्वसितादिकृत्॥

यथा।

"यः कौमारहरः स एव हि वरस्ता एव चैत्रक्षपा-
स्ते चोन्मीलितमालतीसुरभयः प्रौढाः कदम्बानिलाः।
सा चैवास्मि तथापि तत्र सुरतव्यापारलीलाविधौ
रेवारोधसि वेतसीतरुतले चेतः समुत्कण्ठते"॥

अत्र यत्काव्यप्रकाशकारेण रसस्य प्राधान्यमित्युक्तं तद्रस-नधर्म्मयोगित्वाद् व्यभिचारिभावस्यापि रसशब्दवाच्यत्वेन गतार्थं मन्तव्यम्॥ अथोन्मादः।

१८८, चित्तसम्मोह उन्मादः कामशोकभयादिभिः।
अस्थानहासरुदितगीतप्रलपनादिकृत्॥

यथा मम।

"भ्रातर्द्विरेफ भवता भ्रमता समन्तात्
प्राणाधिका प्रियतमा मम वीक्षिता किम्"।
झङ्कारमनुभूय सानन्दम्।
ब्रूषे किमोमिति सखे कथयाशु तन्मे
किं किं व्यवस्यति कुतोऽस्ति च कीदृशीयम्॥

अथ शङ्का।

१८९, परक्रौर्य्यात्मदोषाद्यैः शङ्कानर्थस्य तर्कणम्।
वैवर्ण्यकम्पवैस्वर्य्यपार्श्वालोकाद्यशोषकृत्॥

यथा मम।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

"प्राणेशेन प्रहितनखरेष्वङ्कुरेषु क्षपान्ते
जातासङ्गा रचयति चिरं चन्दनालेपनानि ।
धत्ते लाक्षारसकृतधरे दत्तदन्तावघाते
क्षामाङ्गीयं चकितमभितश्चक्षुषी विक्षिपन्ती" ॥

अथ स्मृतिः ।

१९०, सदृशज्ञानचिन्ताद्यैर्भूसमुन्नमनादिकृत् ।
स्मृतिः पूर्वानुभूतार्थविषयज्ञानमुच्यते ॥

यथा मम ।

"मयि सकपटं किञ्चित् क्वापि प्रणीतविलोचने
किमपि नयनं प्राप्ते तिर्य्यग्विजृम्भिततारकम् ।
स्मितमुपगतामालीं दृष्ट्वा सलज्जमवाञ्चितं
कुवलयदृशः स्मेरं स्मेरं स्मरामि तदाननम्" ॥

अथ मतिः ।

१९१, नीतिमार्गानुसृत्यादेरर्थनिर्द्धारणं मतिः ।
स्मेरता धृतिसन्तोषौ बहुमानश्च तद्भवाः ॥

यथा ।

"असंशयं क्षत्रपरिग्रहक्षमा यदार्य्यमस्यामभिलाषि मे मनः ।
सतां हि सन्देहपदेषु वस्तुषु प्रमाणमन्तःकरणप्रवृत्तयः" ॥

अथ व्याधिः ।

१९२, व्याधिर्ज्वरादिर्वाताद्यैर्भूमीच्छोत्कम्पनादिकृत् ।

तत्र दाहमयत्वे भूमीच्छादयः । शैत्यमयत्वे उत्कम्पनादयः ।
स्पष्टमुदाहरणम् । अथ त्रासः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१९३, निर्वातविद्युदुल्काद्यैस्त्रासः कम्पादिकारकः

यथा ।

"परिस्फुरन्मीनविघट्टितोरवः सुराङ्गनास्त्रासविलोलदृष्टयः । उपाययुः कम्पितपाणिपल्लवाः सखीजनस्यापि विलोकनीयताम्" *॥

अथव्रीडा ।

१९४,

धार्ष्ट्याभावो व्रीडा वदनानमनादिकृद् दुराचारात्

यथा । "मयि सकपटमित्यादि" । अथ हर्षः ।

१९५, हर्षस्त्विष्टावाप्तेर्मनः प्रसादोऽश्रुगद्गदादिकरः

यथा ।

"समीक्ष्य पुत्रस्य चिरात्पिता सुखं निधानकुम्भस्य यथैव दुर्गतः । मुदा शरीरे प्रबभूव नात्मनः पयोधिरिन्दूदयमूर्च्छितो यथा"॥

अथासूया ।

१९६, असूयान्यगुणद्वेषिमौद्धत्यादसहिष्णुता ।
दोषोद्घोषभ्रूविभेदावज्ञाक्रोधेङ्गितादिकृत् ॥

यथा ।

"अथ तत्र पाण्डुतनयेन सदसि विहितं मधुद्विषः ।
मानमसहत न चेदिपतिः परदृद्धिमत्सरि मनो हि मानिनाम्"॥

अथ विषादः ।

---

* परिस्फुरदिति जलविहारवर्णनमिति टीका ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१९७, उपायाभावजन्मा तु विषादः सत्त्वसङ्क्षयः।
निःश्वासोच्छ्वासहृत्तापसहायान्वेषणादिकृत्॥

यथा मम ।

"एषा कुटिलघनेण चिउरकडापेण तुह णिबद्धा वेणी।
मह सहि दावइ दंशइ आअसजट्ठिव्व कालउरइव्व हिअअं"* ॥

अथ धृतिः ।

१९८, ज्ञानाभीष्टागमाद्यैस्तु सम्पूर्णस्पृहताधृतिः।
सौहित्यवचनोल्लाससहासप्रतिभादिकृत् ॥

यथा मम ।

"कृत्वा दीननिपीडनां निजजने बद्ध्वा वचोविग्रहं
नैवालोच्य गरीयसीरपि चिरादासुष्मिकीर्यातनाः ।
द्रव्यौघाः परिसञ्चिताः खलु मया यस्याः कृते साम्प्रतं
नीवाराञ्जलिनापि केवलमहो सेयं कृतार्था तनुः" ।

अथ चपलता ।

१९९, मात्सर्यद्वेषरागादेश्चापल्यं त्वनवस्थितिः ।
तत्र भर्त्सनपारुष्यस्वच्छन्दाचरणादयः ॥

यथा ।

"अन्यासु तावदुपमर्दसहासु भृङ्ग
लोलं विनोदय मनः सुमनोलतासु ।

* एषेति । एषा कुटिलघनेन चिकुरकलापेन तव निबद्धा वेणी।
मम सखि दारयति दशत्यायसयष्टिरिव कालोरगीव हृदयम् ॥
इति । सं टी० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सुग्धामजातरजसं कलिकामकाले
व्यर्थं कदर्थयसि किं नवमालिकायाः" ॥

अथ ग्लानिः।

२००, रत्यायासमनस्तापक्षुत्पिपासादिसम्भवा।
ग्लानिर्निष्प्राणताकम्पकार्श्यानुत्साहतादिकृत्॥

यथा।

"किशलयमिव मुग्धं बन्धनाद्विप्रलूनं
हृदयकुसुमशोषी दारुणो दीर्घशोकः।
ग्लपयति परिपाण्डु चाममस्याः शरीरं
शरदिज इव घर्म्मः केतकीपत्रगर्भम्" ॥

अथ चिन्ता।

२०१, ध्यानंचिन्ताहितानाप्तेःशून्यताश्वासतापकृत्।

यथा मम।

"कमलेण विहसिएण संयोएन्ती विरोहिणं ससिबिम्बं।
करअलपल्लत्थमुही किं चिन्तसि सुमुहि अन्तराहिअहि-
अथ वितर्कः॥ [अआ"* ॥

२०२,
तर्को विचारः सन्देहाद् भ्रूशिरोऽङ्गुलिनर्त्तकः॥

यथा। "किं रुद्रः प्रिययेत्यादि" ॥ "एते च त्रयस्त्रिंशद्व्यभिचारिभेदा इति यदुक्तं" तदुपलक्षणमित्याह।

---

* कमलेणेति॥ कमलेन विकसितेन संयोजयन्ती विरोधिनं शशिबिम्बम्। करतलपर्यस्तमुखी किं चिन्तयसि सुमुखि अन्तराहितहृदया॥ इति। सं टी०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

२०३, रत्यादयोऽप्यनियते रसेष्युर्व्यभिचारिणः।

तथा हि शृङ्गारेऽनुच्छिद्यमानतयावस्थानाद् रतिरेव स्थायिशब्दवाच्या। हासः पुनरुत्पद्यमानो व्यभिचार्येव व्यभिचारिलक्षणयोगात्। तदुक्तं "रसावस्थः परं भावः स्थायितां प्रतिपद्यते"। तत्कस्य स्थायिनः कस्मिन् रसे सञ्चारित्वमित्याह।

२०४, शृङ्गारवीरयोर्हासो वीरे क्रोधस्तथामतः॥
शान्ते जुगुप्सा कथिता व्यभिचारितया पुनः।
इत्याद्यन्यत्समुन्नेयं स्वयंभावितबुद्धिभिः॥

अथ स्थायी भावः।

२०५, अविरुद्धा विरुद्धा वा यं तिरोधातुमक्षमाः।
आस्वादाङ्कुरकन्दोऽसौ भावः स्थायीति सम्मतः॥

यदुक्तम्।

"स्वकस्वतवृत्त्या भावानामन्येषामनुगामुकः।
न तिरोधीयते स्थायी तैरसौ पुष्यते परमिति"॥

तद्भेदानाह।

२०६, रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा।
जुगुप्सा विस्मयश्चेत्यमष्टौ प्रोक्ताः शमोऽपि च॥

तत्र।

२०७, रतिर्मनोनुकूलेऽर्थे मनसः प्रवणायितम्।
वागादिवैकृताच्चेतोविकासो हास इष्यते॥
इष्टनाशादिभिश्चेतोवैक्लव्यं शोकशब्दभाक्।
प्रतिकूलेषु तैक्ष्ण्यस्यावबोधः क्रोध इष्यते॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कार्य्यारम्भेषु संरम्भः स्थेयानुत्साह उच्यते ।
रौद्रशक्त्या तु जनितं चित्तवैक्लव्यकं भयम् ॥
दोषेक्षणादिभिर्गर्हा जुगुप्सा विषयोद्भवा ।
विविधेषु पदार्थेषु लोकसीमातिवर्त्तिषु ॥
विस्फारश्चेतसो यस्तु स विस्मय उदाहृतः ।
शमो निरीहावस्थायामात्मविश्रामजं सुखम् ॥

यथा मालतीमाधवे रतिः । नटकमेलके हासः । रामायणे शोकः । महाभारते शमः । एवमन्येऽपि । एते हि एतेष्वन्तरा उत्पद्यमानैस्तैस्तैर्विरुद्धैरविरुद्धैश्च भावैरनुच्छिन्नाः प्रत्युत परिपुष्टा एव स्वहृदयानुभवसिद्धाः ।

किञ्च ।

२०८, नानाभिनयसम्बन्धान्भावयन्तिरसान्यतः
तस्माद्भावा अमीप्रोक्ताः स्थायिसञ्चारिसात्त्विकाः ॥

यदुक्तम् ।

"सुखदुःखादिभिर्भावैर्भावस्यभावभावनम्" ॥

अथ रसस्य भेदनाह ।

२०९, शृङ्गारहास्यकरुणरौद्रवीरभयानकाः ।
बीभत्साद्भुत इत्यष्टौ रसाः शान्तस्तथा मतः ॥

तत्र शृङ्गारः ।

२१०, शृङ्गं हि मन्मथोद्भेदस्तदागमनहेतुकः ।
उत्तमप्रकृतिप्रायो रसः शृङ्गार इष्यते ॥
परोढां वर्जयित्वात्र वेश्याञ्चाननुरागिणीम् ।
आलम्बनं नायिकाः स्युर्दक्षिणाद्याश्च नायकाः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चन्द्रचन्दनरोलम्बरुताद्युद्दीपनं मतम्।
भ्रूविक्षेपकटाक्षादिरनुभावः प्रकीर्त्तितः॥
त्यक्तौग्र्यमरणालस्यजुगुप्साव्यभिचारिणः।
स्थायी भावो रतिः श्यामवर्णोऽयं विष्णुदैवतः॥

यथा। "शून्यं वासगृहमित्यादि"। अत्र उक्तस्वरूपः पतिरुक्तस्वरूपा च बाला आलम्बनविभावौ। शून्यं वासगृहमुद्दीपनविभावः। चुम्बनमनुभावः। लज्जाहासौ व्यभिचारिणौ। एतैरभिव्यक्तः सहृदयरतिभावः शृङ्गाररूपतां भजते। तद्भेदावाह।

२११, विप्रलम्भोऽथ सम्भोग इत्येष द्विविधो मतः।

तत्र।

२१२,
यत्र तु रतिः प्रकृष्टा नाभीष्टमुपैति विप्रलम्भोऽसौ॥

अभीष्टं नायकं नायिकां वा।

२१३
स च पूर्व्वरागमानप्रवासकरुणात्मकश्चतुर्द्धास्यात्॥

तत्र।

२१४, श्रवणाद्दर्शनाद्वापि मिथः संरूढरागयोः।
दशाविशेषो योऽप्राप्तौ पूर्व्वरागः स उच्यते॥
श्रवणन्तु भवेत्तत्र दूतवन्दिसखीमुखात्।
इन्द्रजाले च चित्रे च साक्षात्स्वप्ने च दर्शनम्॥
अभिलाषश्चिन्ता स्मृतिगुणकथनोद्वेगसंप्रलापाश्च।
उन्मादोऽथव्याधिर्जडतामृतिरितिदशात्रकामदशाः॥ अभिलाषः स्पृहा चिन्ता प्राप्त्युपायादिचि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्तनम् । उन्मादश्चापरिच्छेदश्चेतनाचेतनेष्वपि ॥
अलक्ष्यत्वाक् प्रलापः स्याच्चेतसो भ्रमणाद्भ्रमम् ।
व्याधिस्तु दीर्घनिःश्वासपाण्डुताकृशतादयः ॥
जडता हीनचेष्टत्वमङ्गानां मनसस्तथा ।

शेषं स्पष्टम् । क्रमेणोदाहरणानि ।

"प्रेमार्द्राः प्रणयस्पृशः परिचयादुद्गाढरागोदया-
स्तास्तामुग्धदृशो विसर्गमधुराश्चेष्टा भवेयुर्मयि ।
यास्वन्तःकरणस्य वाक्करणव्यापाररोधीक्षणा-
दाशंसापरिकल्पितास्वपि भवत्यानन्दसान्द्रो लयः" ॥

अत्र मालतीसाक्षाद्दर्शनप्ररूढरागस्य माधवस्याभिलाषः ॥

"कथमीक्षे कुरङ्गाक्षीं साक्षाल्लक्ष्मीं मनोभुवः ।
इति चिन्ताकुलः क्रान्तो निद्रां नैति निशिथिनीम्" ॥

अथ कस्याश्चिन्नायिकाया इन्द्रजालदर्शनप्ररूढरागस्य नायकस्य चिन्ता । इदं मम । "मयि सकपटमिति" आदौ नायकस्य स्मृतिः । "नेत्रे खञ्जनगञ्जने" इत्यादौ गुणकथनम् । "श्वासान् मुञ्चतीत्यादौ" उद्वेगः ।

"त्रिभागशेषासु निशासु च क्षणं निमील्य नेत्रे सहसा व्यबुद्ध्यत । क्व नीलकण्ठ व्रजसीत्यलक्ष्यवागसत्यकण्ठार्पित-बाहुबन्धना" ॥

अत्र प्रलापः । "श्वातर्द्विरेफेत्यादौ" उन्मादः ।

"पाण्डुश्यामं वदनं हृदयं सरसं तवालसञ्च वपुः ।
आवेदयति नितान्तं चतियरोगं सखि हृदन्तः" ॥

अत्र व्याधिः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

"भिसिणीअलसअणीए निहिअं सव्वं सुणिच्चलं अङ्गं ।
दीहो णीसासहरो एससाहेइ जीव्व इति परं*" ॥

अथ जडता । इदं मम ॥

२१५, रसविच्छेदहेतुत्वान्मरणं नैव वर्ण्यते ।
जातप्रायन्तु तद्वाच्यं चेतसाकाङ्क्षितं तथा ॥
वर्ण्यतेऽपि यदि प्रत्युज्जीवनं स्यादद्दूरतः ।

तत्राद्यं यथा ।

"शेफालिकां विदलितामवलोक्य तन्वी
प्राणान् कथञ्चिदपि धारयितुं प्रभूता ।
आकर्ण्य सम्प्रति रुतं चरणायुधानां
किं वा भविष्यति न वेद्मि तपस्विनी सा" ॥

द्वितीयं यथा ।

"रोलम्बाः परिपूरयन्तु हरितो झङ्कारकोलाहलै-
र्मन्दं मन्दमुपैतु चन्द्रनवनीजातो नभस्वानपि ।
माद्यन्तः कलयन्तु चूतशिखरे केलीपिकाः पञ्चमं
प्राणाः सत्वरमश्मसारकठिना गच्छन्तु गच्छन्त्वमी" ॥

ममैतौ ॥ तृतीयं यथा ।

कादम्बर्य्यां महाश्वेतापुण्डरीकवृत्तान्ते । एष च प्रकारः करुणविप्रलम्भविषय इति वक्ष्यामः ॥ केचित्तु । "नयनप्रीतिः प्रथमं चित्तासङ्गस्ततोऽथ सङ्कल्पः । निद्रा-

---

* भिसिणीति । बिसिनीदलशयनीये निहितं सर्वं सुनिश्चलं अङ्गम् । दीर्घो निश्वासभर एष साधयति जीवयति परम् ॥ इति । सं० टी० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

च्छेदस्तनुताविषयनिवृत्तिस्त्वपानाशः। उन्मादो मूर्च्छा-
मृतिरित्येताः स्मरदशादशैव स्युः इत्याहुः॥ तत्र च।

२१६,
आदौ वाच्यस्त्रिया रागः पुंसः पश्चात्तदिङ्गितैः॥

इङ्गितान्युक्तानि यथा रत्नावल्यां सागरिकावत्सराजयोः।
आदौ पुरुषानुरागे सम्भवत्यप्येवमधिकं हृदयङ्गमं भवति॥

२१७,
नीलीकुसुम्भमञ्जिष्ठाः पूर्वरागोऽपि च त्रिधा।
न चातिशोभते यन्नापैति प्रेम मनोगतम्॥
तन्नीलीरागमाख्यान्ति यथा श्रीरामसीतयोः।
कुसुम्भरागं तं प्राहुर्यदपैति च शोभते॥
मञ्जिष्ठारागमाहुस्तं यन्नापैत्यतिशोभते।

अथ मानः।

२१८,मानः कोपः स तु द्वेधा प्रणयेर्ष्यासमुद्भवः।
द्वयोः प्रणयमानः स्यात् प्रमोदे सुमहत्यपि॥
प्रेम्णः कुटिलगामित्वात् कोपो यः कारणं विना।

द्वयोरिति नायकस्य नायिकायाश्च उभयोः प्रणयमानो वर्णनीयः। उदाहरणम्। तत्र नायकस्य यथा।
"अलीअपसुत्तअ बिणिमीलिअछ देसु सुहअ मज्झ ओ-आसं। गण्डपरिउम्बणपुलइअङ्ग न उणो चिराइ:सं"*।

---

* अली इति। अलीकप्रसुप्तक विनिमीलिताक्ष देहि सुभग मह्य-मवकाशम्। गण्डपरिचुम्बनपुलकिताङ्ग न पुनश्चिरयिष्यामीति इति। सं० टी०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नायिकाया यथाकुमारसम्भवे सन्ध्यावर्णनावसरे । उभयोर्यथा ।

"पणअकुविआणं दोण्हंवि अलिअपसुत्ताणं माणइणीणं ।
णिच्चलणिरुद्धणीसासदिण्णकण्णाणं को मल्लः"*॥

अनुनयपर्यन्तासहने त्वस्य न विप्रलम्भभेदता किन्तु सम्भोगसञ्चारीर्ष्याख्यभावत्वम् । यथा ।

"भ्रूभेदे रचितेऽपि दृष्टिरधिकं सौत्कण्ठमुद्वीक्षते
रुद्धायामपि वाचि सस्मितमिदं दग्धाननं जायते ।
कार्कश्यं गमितेऽपि चेतसि तनूरोमाञ्चमालम्बते
दृष्टे निर्व्वहणं भविष्यति कथं मानस्य तस्मिन् जने" ॥

यथा वा ।

"एकस्मिन् शयने पराङ्मुखतया वीतोत्तरं ताम्यतो-
रन्योन्यस्य हृदिस्थितेऽप्यनुनये संरक्षतोर्गौरवम् ।
दम्पत्योः शनकैरपाङ्गवलनान्मिश्रीभवच्चक्षुषो-
र्भग्नो मानकलिः सहासरभसव्यासक्तकण्ठग्रहः" ॥

२१९, पत्युरन्यप्रियासङ्गे दृष्टेऽथानुमिते श्रुते ॥
ईर्ष्या मानो भवेत् स्त्रीणां तत्र त्वनुमितिस्त्रिधा ।
उत्स्वप्नायितभोगाङ्कगोत्रस्खलनसम्भवा ॥

तत्र दृष्टे यथा ।

"विनयतिसुदृशोदृशोः परागंप्रणयिनि कौसुमभाननानिलेन
तदहितयुवतेरभीक्ष्णमक्ष्णोर्द्वयमपि रोषरजोभिरापुपूरे"॥

---

* पणअकुविआणमिति । प्रणयकुपितयोर्द्वयोरप्यसुप्तयोर्मानिनि-द्वयोः । निश्चलनिरुद्धनिश्वासदत्तकर्णयोः को मल्ल इति । सं० टी०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सम्भोगचिह्नेनानुमिते यथा ।

"नवनखपदमङ्गं गोपयस्यंशुकेन
स्थगयसि पुनरोष्ठं पाणिना दन्तदष्टम् ।
प्रतिदिशमपरस्त्रीसङ्गशंसी विसर्पन्
नवपरिमलगन्धः केन शक्यो वरीतुम्" ॥

एवमन्यत्र ।

२२०, सामभेदोऽथ दानञ्च नत्युपेक्षे रसान्तरम् ।
तद्भङ्गाय पतिः कुर्य्यात् षडुपायानिति क्रमात् ॥
तत्र प्रियवचः साम भेदस्तत्सख्युपार्जनम् ।
दानं व्याजेन भूषादेः पादयोः पतनं नतिः ॥
सामादौ तु परिक्षीणे स्यादुपेक्षावधारणम् ।
रभसत्रासहर्षादेः कोपभ्रंशो रसान्तरम् ॥

यथा । "नो चाटुश्रवणे इत्यादि" । अत्र हि सामादयः पञ्च सूचिताः । रसान्तरमूह्यम् । अथ प्रवासः ।

२२१, प्रवासो भिन्नदेशत्वं कार्य्याच्छापाच्चसम्भ्रमात् ।
तत्राङ्गचेलमालिन्यमेकवेणीधरं शिरः ॥
निश्वासोच्छ्वासरुदितभूमिपातादि जायते ।

किञ्च ।

२२२, अङ्गेष्वसौष्ठवं तापः पाण्डुता कृशतारुचिः ॥
अधृतिः स्यादनालम्बस्तन्मयोन्मादमूर्च्छनाः ।
मृतिश्चेति क्रमाज्ज्ञेयादश स्मरदशा इह ॥
असौष्ठवं मलापत्तिस्तापस्तु विरहज्वरः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अरुचिर्व्वस्तुवैराग्यं सर्व्वत्रारागिता धृतिः ॥
अनालम्बनता चापि शून्यता मनसः स्मृता।
तन्मयं तत्प्रकाशो हि वाह्याभ्यन्तरतस्तथा ॥

शेषं स्पष्टम् । एकदेशतो यथा मम तातपदानाम् ।

"चिन्ताभिः स्तिमितं मनः करतले लीना कपोलस्थली
प्रत्यूषक्षणदेशपाण्डवदनं श्वासैकखिन्नोऽधरः ।
अस्रः शीकरपद्मिनीकिशलयैर्नोपैति तापः शमं
कोऽस्याः प्रार्थितदुर्लभोऽस्ति सहते दीनां दशामीदृशीम्" ॥

२२३, भावी भवन् भूत इति त्रिधा स्यात्तत्कार्य्यजः।

कार्य्यजस्य बुद्धिपूर्व्वकत्वात् त्रैविध्यम्। तत्र भावी यथा मम ।

"यामः सुन्दरि याहि पाश्य दयिते शोकं वृथा मा कृथाः
शोकस्ते गमने कुतो मम ततो वाष्पं कथं मुञ्चसि ।
शीघ्रं न व्रजसीति मां गमयितुं कस्मादियं ते त्वरा
भूयानस्य सह त्वया जिगमिषोर्ज्जीवस्य मे संभ्रमः" ॥

भवन् यथा ।

"प्रस्थानं वलयैः कृतं प्रियसखैरश्रैरजस्रं नतं
वृत्या न क्षणमासितं व्यवसितं चित्तेन गन्तुं पुरः ।
यातुं निश्चितचेतसि प्रियतमे सर्वे समं प्रस्थिता
गन्तव्ये सति जीवितप्रियसुहृत् सार्थः किमु त्यज्यते" ॥

भूतो यथा । "चिन्ताभिः स्तिमितमित्यादि"। शापाद् यथा । "तां जानीया इत्यादि" । सम्भ्रमो दिव्यमानुषनिर्घातोत्पातादिजः । यथा । विक्रमोर्व्वश्यामुर्व्वशीपुरूरवसोः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अत्र पूर्वरागोक्तानामभिलाषादीनामत्रोक्तानाञ्चाङ्गा-सौष्ठवादीनामपि दृशानामुभयेषामप्युभयत्र सम्भवेऽपि चिरन्तनप्रसिद्ध्या विविच्य प्रतिपादनम् ॥

अथ करुणः ।

२२४, यूनोरेकतरस्मिन्गतवतिलोकान्तरं पुनर्लभ्ये॥
विमनायते यदैकस्तदा भवेत्करुणविप्रलम्भाख्यः।

यथा कादम्बर्यां पुण्डरीकमहाश्वेतावृत्तान्ते ॥

पुनरलभ्ये शरीरान्तरेण वा लभ्ये तु करुणाख्य एव रसः । किञ्चात्राकाशसरस्वतीभाषानन्तरमेव शृङ्गारः । सङ्गमप्रत्याशया रतेरुद्भवात् । अयन्तु "करुणः" इत्यभियुक्ता मन्यन्ते । यच्चात्र "सङ्गमप्रत्याशानन्तरमपि भवतो विप्रलम्भशृङ्गारस्य प्रवासाख्यो भेदः एव इति" केचिदाहुः । तदन्ये मरणरूपविशेषसम्भवाद्भिन्नमपि मन्यन्ते । अथ सम्भोगः ॥

२२५, दर्शनस्पर्शनादीनि निषेवेते विलासिनौ ॥
यत्रानुरक्तावन्योन्यं सम्भोगोऽयमुदाहृतः ।

आदिशब्दादन्योन्याधरपानचुम्बनादयः । यथा । "शून्यं वासगृहमित्यादि" ।

२२६, संख्यातुमशक्यतयाचुम्बनपरिरम्भनादि-बहुभेदात् ॥ अयमेक एव धीरैः कथितः सम्भोगशृङ्गारः। तत्र ख्यादृतुषट्कं चन्द्रादित्यौ तथास्तमयः ॥ जलकेलिवनविहारप्रभातमधुपानयामिनीप्रभृतिः। अनुलेपनभूषाद्या वाच्यं शुचि मेध्यमन्यच्च ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तथाच भरतः। "यत्किञ्चिल्लोके शुचि मेध्यमुज्ज्वलं दर्शनीयं वा तत्सर्वं शृङ्गारेणोपमीयते उपयुज्यते"। किञ्च।

२२७, कथितश्चतुर्विधोऽसावानन्तर्य्यात्तुपूर्वरागादेः यदुक्तम्।

"न विना विप्रलम्भेन सम्भोगः पुष्टिमश्नुते।
कषायिते हि वस्त्रादौ भूयान्रागो विवर्द्धते"॥

तत्र पूर्वरागानन्तरं सम्भोगो यथा कुमारसम्भवे पार्वती-परमेश्वरयोः। प्रवासानन्तरं सम्भोगो यथा मम तात-पादानाम्।

"चेमं ते ननु पच्छलाचि किषअं चेमं महङ्गं दढं
एतादृक् कृसता कुतस्सुह पुणो पुट्ठं सरीरं जदो।
केनाहं पृथुलः प्रिये प्रणइणीदेहःस सम्भोलनात्
त्वत्तः सुम्भु ण कापि मे जइ इयं चेमं कुदो पुच्छसि"* ॥

एवमन्यचाप्यूह्यम्। अथ हासः।

---

* चेमं ते इति संस्कृतेन नायकस्य प्रश्नः। प्राकृतेन नायिकाया उत्तरम्॥ किषअं कृशकं चेमं ममाङ्गं दृढं अतिशयं कृशं यन्ममाङ्गं तदेव चेममित्यर्थः।

† अपरौ यथा मम।

"पदप्रणतमालोक्य कान्तमेकान्तकातरम्।
मुञ्चन्ती वाष्पसन्तानं सुमुखी तेन चुम्बिता॥ १॥
कान्ते घोरकृतान्तवक्त्रकुहरात् त्वं पुण्यपुञ्जेन मे
मुक्ता कन्त तदर्जनश्रमभरं प्रत्यङ्गमालिङ्ग्य माम्।
इत्याकर्ण्य निमीलितार्द्धनयनं स्मेरं शनैरानतं
सौल्लासं वदनाम्बुजं मृगदृशः स्वैरं चुचुम्बे प्रियः"॥टी०॥२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

२२८, विकृताकारवाग्वेशचेष्टादेः कुहकाद्भवेत् ॥
हासो हास्यस्थायिभावः श्वेतः प्रमथदैवतः ।
विकृताकारवाक्चेष्टं यदालोक्य हसेज्जनः ॥
तदत्रालम्बनं प्राङ्स्तच्चेष्टोद्दीपनं मतम् ।
अनुभावोऽक्षिसङ्कोचवदनस्मेरतादिकः ॥
निद्रालस्यावहित्याद्या अत्र स्युर्व्यभिचारिणः ।
ज्येष्ठानांस्मितहसितेमध्यानांविहसितावहसितेच
नीचानामपहसितं तथाऽतिहसितञ्च षड्भेदाः।
ईषद्विकासि नयनं स्मितं स्यात् स्पन्दिताधरम् ॥
किञ्चिल्लक्ष्यद्विजं तत्र हसितं कथितं बुधैः ॥
मधुरस्वरंविहसितंसांसशिरःकम्पमवहसितम्॥
अपहसितं साश्रुं विक्षिप्ताङ्गं भवत्यतिहसितम्

यथा मम ।

गुरोर्गिरः पञ्च दिनान्यधीत्य वेदान्तशास्त्राणि दिनत्रयञ्च । अमी समाप्राय च तर्कवादान् समागताः कुक्कुटमिश्रपादाः । अस्य नटकमेलकप्रभृतिषु परिपोषो द्रष्टव्यः । अत्र च ।

२२९,
यस्य हासः स चेत् क्वापि साक्षान्नैव निबध्यते ॥
तथाप्येष विभावादिसामर्थ्यादुपलभ्यते ।
अभेदेन विभावादि साधारण्यात् प्रतीयते ॥
सामाजिकैस्ततो हास्यरसोऽयमनुभूयते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवमन्येष्वपि रसेषु बोद्धव्यम् । अथ करुणः ।

२३०, इष्टनाशाद्दानिष्टाप्तेः करुणाख्यो रसो भवेत् ॥
धीरैः कपोतवर्णोऽयं कथितो यमदैवतः ।
शोकोऽत्र स्थायिभावः स्याच्छोच्यमालम्बनं मतम् ॥
तस्य दाहादिकावस्था भवेदुद्दीपनं पुनः ।
अनुभावा दैवनिन्दा भूपातक्रन्दितादयः ॥
वैवर्ण्योच्छ्वासनिश्वासस्तम्भप्रलपनानि च ।
निर्वेदमोहापस्मारव्याधिग्लानिस्मृतिभ्रमाः ॥
विषादजडतोन्मादचिन्ताद्या व्यभिचारिणः ।

शोच्यं विनष्टबन्धुप्रभृति । यथा मम राघवविलासे ।
"विपिने क्व जटानिबन्धनं तव चेदं क्व मनोहरं वपुः ।
अनयोर्घटनाविधेः स्फुटं ननु खड्गेन शिरीषकर्त्तनम्" ॥
अत्र हि रामवनवासजनितशोकार्त्तस्य दशरथस्य दैवनिन्दा । एवं बन्धुवियोगविभवनाशादावप्युदाहार्य्यम् । परिपोषस्तु महाभारते स्त्रीपर्व्वणि द्रष्टव्यः । अस्य करुणविप्रलम्भाद्भेदमाह ।

२३१, शोकस्थायितया भिन्नो विप्रलम्भादयं रसः ॥
विप्रलम्भे रतिः स्थायी पुनः सम्भोगहेतुकः ।

अथ रौद्रः ।

२३२, रौद्रः क्रोधस्थायिभावो रक्तो रुद्रादिदैवतः ॥
आलम्बनमरिस्तत्र तच्चेष्टोद्दीपनं मतम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मुष्टिप्रहारपतनविक्षतच्छेदावदारणैश्चैव ॥
सङ्ग्रामसम्भ्रमाद्यैरस्योद्दीप्तिर्भवेत् प्रौढा ॥
भ्रुविभङ्गोष्ठनिर्दंशबाहुस्फोटनतर्जनाः ॥
आत्मावदानकथनमायुधोत्क्षेपणानि च ।
अनुभावास्तथाक्षेपक्रूरसन्दर्शनादयः॥
उग्रतावेगरोमाञ्चस्वेदवेपथवो मदः ।
मोहामर्षादयश्चात्र भावाः स्युर्व्यभिचारिणः ॥

यथा ।

"कृतमनुमतं दृष्टं वा यैरिदं गुरु पातकं
मनुजपशुभिर्निर्मर्यादैर्भवद्भिरुदायुधैः ।
नरकरिपुणा सार्द्धं तेषां सभीमकिरीटिना-
मयमहमसृङ्मेदोमांसैः करोमि दिशां बलिम्" ॥

अस्य युद्धवीराद्भेदमाह ।

२३३, रक्ताख्यनेलता चात्र भेदिनी युद्धवीरतः ।

अथ वीरः ।

२३४, उत्तमप्रकृतिर्वीर उत्साहस्थायिभावकः॥
महेन्द्रदैवतोहेमवर्णोऽयं समुदाहृतः ।
आलम्बनविभावास्तु विजेतव्यादयो मताः ॥
विजेतव्यादिचेष्टाद्यास्तस्योद्दीपनरूपिणः ।
अनुभावास्तु तत्र स्युः सहायान्वेषणादयः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सञ्चारिणस्तु धृतिमतिगर्व्वस्मृतितर्करोमाञ्चाः।
स च दानधर्मयुद्धैर्दयया च समन्वितश्चतुर्द्धा स्यात्॥

स च वीरः । दानवीरो धर्म्मवीरो दयावीरो युद्धवीरश्चेति चतुर्व्विधः । तत्र दानवीरो यथा परशुरामः । "त्यागः सप्तसमुद्रमुद्रितमहीनिर्व्याजदानावधिरिति" । अत्र परशुरामस्य त्यागे उत्साहः स्थायी भावः। सम्प्रदानब्राह्मणैरालम्बनविभावैः सत्त्वाध्यवसायादिभिश्चोद्दीपनविभावैर्व्विभावितः सर्व्वस्वत्यागादिभिरनुभावितो हर्षधृत्यादिभिः सञ्चारिभिः पुष्टिं नीतो दानवीरतां भजते । धर्म्मवीरो यथा युधिष्ठिरः ।

"राज्यञ्च वसु देहञ्च भार्य्याभ्रातृसुताश्च ये ।
यच्च लोके ममायत्तं तद्धर्म्माय सदोद्यतम्" ॥

युद्धवीरो यथा श्रीरामचन्द्रः ।

"भो लङ्केश्वर दीयतां जनकजा रामः स्वयं याचते
कोऽयं ते मतिविभ्रमः स्मर नयं नाद्यापि किञ्चित्कृतम् ।
नैवञ्चेत् खरदूषणत्रिशिरसां कण्ठासृजा पङ्किलः
पत्री नैष सहिष्यते मम धनुर्ज्याबन्धबन्धूकृतः" ॥

दयावीरो यथा जीमूतवाहनः ।

"शिरामुखैः स्यन्दत एव रक्तमद्यापि देहे मम मांसमस्ति ।
तृप्तिं न पश्यामितवापितावत् किं भक्षणात्त्वंविरतोगरुत्मन्"

एष्वपि विभावादयः पूर्व्वोदाहरणवद्ज्ञेयाः ।

अथ भयानकः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

२३५, भयानको भयस्थायिभावः कालाधिदैवतः।
स्त्रीनीचप्रकृतिः कृष्णो मतस्तत्त्वविशारदैः ॥
यस्मादुत्पद्यते भीतिस्तदत्रालम्बनं मतम् ।
चेष्टा घोरतरास्तस्य भवेदुद्दीपनं पुनः ॥
अनुभावोऽत्र वैवर्ण्यगद्गदस्वरभाषणम् ।
प्रलयस्वेदरोमाञ्चकम्पदिक्प्रेक्षणादयः ॥
जुगुप्सावेगसम्मोहसन्त्रासग्लानिदीनताः ।
शङ्कापस्मारसम्भ्रान्तिमृत्व्याद्या व्यभिचारिणः

यथा ।

"नष्टं वर्षवरैर्मनुष्यगणनाभावादपास्य त्रपामन्तः कञ्चुकि कञ्चुकस्य विशति त्रासादयं वामन इत्यादि" ॥

अथ बीभत्सः ।

२३६, जुगुप्सास्थायिभावस्तु बीभत्सः कथ्यते रसः ।
नीलवर्णो महाकालदैवतोऽयमुदाहृतः ॥
दुर्गन्धमांसपिशितमेदांस्यालम्बनं मतम् ।
तत्रैव कृमिपाताद्यमुद्दीपनमुदाहृतम् ॥
निष्ठीवनाद्यवलननेत्रसङ्कोचनादयः ।
अनुभावास्तत्र मतास्तथा स्युर्व्यभिचारिणः ॥
मोहोऽपस्मार आवेगो व्याधिश्च मरणादयः ।

यथा ।

"उत्कृत्योत्कृत्य कृत्तिं प्रथममथ पृथूच्छोथमूर्यांसि मांसान्यंसस्फिक्पृष्ठपिण्डाद्यवयवसुलभान्युग्रपूतीनि जग्ध्वा ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अन्तः पर्य्यस्तनेत्रः प्रकटितदशनः प्रेतरङ्गः करङ्गा-
दङ्गस्यादश्यिसंस्थं स्थपुटगतमपि क्रव्यमव्यग्रमत्ति" ॥

अथाद्भुतः ।

२३७, अद्भुतो विस्मयस्थायिभावो गन्धर्वदैवतः॥
पीतवर्णो वस्तु लोकातिगमालम्बनं मतम् ।
गुणानां तस्य महिमा भवेदुद्दीपनं पुनः ॥
स्तम्भः स्वेदोऽथ रोमाञ्चगद्गदस्वरसम्भ्रमाः ।
तथा नेत्रविकासाद्या अनुभावाः प्रकीर्त्तिताः ॥
वितर्कावेगसम्भ्रान्तिहर्षाद्या व्यभिचारिणः ।

यथा ।

"दोर्दण्डाञ्चितचन्द्रशेखरधनुर्दण्डावभङ्गोद्यत-
टङ्कारध्वनिरार्य्यबालचरितप्रस्तावनाडिण्डिमः ।
द्राक्पर्य्यस्तकपालसंपुटमिलद्ब्रह्माण्डभाण्डोदर-
भ्राम्यत्पिण्डितचण्डिमा कथमहो नाद्यापि विश्राम्यति"॥

अथ शान्तः ।

२३८, शान्तः शमस्थायिभाव उत्तमप्रकृतिर्मतः ॥
कुन्देन्दुसुन्दरच्छायः श्रीनारायणदैवतः ।
अनित्यत्वादिनाऽशेषवस्तुनिःसारता तु या ॥
परमात्मस्वरूपं वा तस्यालम्बनमिष्यते ।
पुण्याश्रमहरिक्षेत्रतीर्थरम्यवनादयः ॥
महापुरुषसङ्गाद्यास्तस्योद्दीपनरूपिणः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

२३५, भयानको भयस्थायिभावः कालाधिदैवतः ।
स्त्रीनीचप्रकृतिः कृष्णो मतस्तत्त्वविशारदैः ॥
यस्मादुत्पद्यते भीतिस्तदत्रालम्बनं मतम् ।
चेष्टा घोरतरास्तस्य भवेदुद्दीपनं पुनः ॥
अनुभावोऽत्र वैवर्ण्यगद्गदस्वरभाषणम् ।
प्रलयस्वेदरोमाञ्चकम्पदिक्प्रेक्षणादयः ॥
जुगुप्सावेगसम्मोहसन्त्रासग्लानिदीनताः ।
शङ्कापस्मारसम्भ्रान्तिमृत्व्याद्या व्यभिचारिणः

यथा ।

"नष्टं वर्षवरैर्मनुष्यगणनाभावादपास्य त्रपामन्तः कञ्चुकि कञ्चुकस्य विशति त्रासादयं वामन इत्यादि" ॥

अथ बीभत्सः ।

२३६, जुगुप्सास्थायिभावस्तु बीभत्सः कथ्यते रसः ।
नीलवर्णो महाकालदैवतोऽयमुदाहृतः ॥
दुर्गन्धमांसपिशितमेदांस्यालम्बनं मतम् ।
तत्रैव कृमिपाताद्यमुद्दीपनमुदाहृतम् ॥
निष्ठीवनास्यवलननेत्रसङ्कोचनादयः ।
अनुभावास्तत्र मतास्तथा स्युर्व्यभिचारिणः ॥
मोहोऽपस्मार आवेगो व्याधिश्च मरणादयः ।

यथा ।

"उत्कृत्योत्कृत्य कृत्तिं प्रथममथ पृथूच्छोथमूयांसि मांसान्यंसस्फिक्पृष्ठपिण्डाद्यवयवसुलभान्युग्रपूतीनि जग्ध्वा ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अन्तः पर्य्यस्तनेत्रः प्रकटितदशनः प्रेतरङ्कः करङ्का-
दङ्कस्थादस्थिसंस्थं स्थपुटगतमपि क्रव्यमव्यग्रमत्ति" ॥

अथाद्भुतः ।

२३७, अद्भुतो विस्मयस्थायिभावो गन्धर्वदैवतः॥
पीतवर्णो वस्तु लोकातिगमालम्बनं मतम् ।
गुणानां तस्य महिमा भवेदुद्दीपनं पुनः ॥
स्तम्भः स्वेदोऽथ रोमाञ्चगद्गदस्वरसम्भ्रमाः ।
तथा नेत्रविकासाद्या अनुभावाः प्रकीर्त्तिताः ॥
वितर्कावेगसम्भ्रान्तिहर्षाद्या व्यभिचारिणः ।

यथा ।

"दोर्दण्डाञ्चितचन्द्रशेखरधनुर्दण्डावभङ्गोद्यत-
टङ्कारध्वनिरार्य्यबालचरितप्रस्तावनाडिण्डिमः ।
ट्राक्पर्य्यस्तकपालसंपुटमिलद्ब्रह्माण्डभाण्डोदर-
भाव्यत्पिण्डितचण्डिमा कथमहो नाद्यापि विश्राम्यति"॥

अथ शान्तः ।

२३८, शान्तः शमस्थायिभाव उत्तमप्रकृतिर्मतः ॥
कुन्देन्दुसुन्दरच्छायः श्रीनारायणदैवतः ।
अनित्यत्वादिनाऽशेषवस्तुनिःसारता तु या ॥
परमात्मस्वरूपं वा तस्यालम्बनमिष्यते ।
पुण्याश्रमहरिक्षेत्रतीर्थरम्यवनादयः ॥
महापुरुषसङ्गाद्यास्तस्योद्दीपनरूपिणः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रोमाञ्चाद्याश्चानुभावास्तथाऽस्युर्व्यभिचारिणः॥
निर्वेदहर्षस्मरणमतिभूतदयादयः।

यथा।

"रथ्यान्तरचरतस्तथा धृतजरत्कन्थालवस्याध्वगैः
सत्रासञ्च सकौतुकञ्च सदयं दृष्टस्य तैर्नागरैः।
निर्व्याजीकृतचित्सुधारससुदा निद्रायमाणस्य मे
निःशङ्कं करटः कदा करपुटीभिक्षां विलुण्ठिष्यति"॥

पुष्टिस्तु महाभारतादौ द्रष्टव्या॥

२३९, निरहङ्कारकरूपत्वाद्दयावीरादिरेष नो॥

दयावीरादौ हि जीमूतवाहनादौ अन्तरा मलयवत्याद्यनुरागादेरन्ते च विद्याधरचक्रवर्त्तित्वाद्याप्तेर्दर्शनादहङ्कारोपशमो न दृश्यते। शान्तस्तु सर्व्वप्रकारेणाहङ्कारप्रशमैकरूपत्वान्न तत्रान्तर्भावमर्हति। अतश्च नागानन्दे शान्तरसप्रधानत्वमपास्तम्॥ ननु।

"न यत्र दुःखं न सुखं न चिन्ता न द्वेषरागौ न च काचिदिच्छा। रसः स शान्तः कथितो मुनीन्द्रैः सर्व्वेषु भावेषु शमप्रमाणः"॥

इत्येवंरूपस्य शान्तस्य मोक्षावस्थायामेवात्मस्वरूपापत्तिलक्षणायां प्रादुर्भावात् तत्र सञ्चार्य्यादीनामभावात् कथं रसत्वमित्युच्यते।

२४०, युक्तवियुक्तदशायामवस्थितो यः समस एव यतः। रसतामेति तदस्मिन् सञ्चार्य्यादेः स्थितिश्च न विरुद्धा॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यश्चास्मिन् सुखाभावोऽयुक्तस्तस्य वैषयिकसुखपरत्वान्न विरोधः । उक्तं हि ।

"यच्च कामसुखं लोके यच्च दिव्यं महासुखम् ।
तृष्णाक्षयसुखस्यैते नार्हतः षोडशीं कलाम् ॥
सर्व्वाकारमहङ्काररहितत्वं व्रजन्ति चेत् ।
अतान्तर्भावमर्हन्ति दयावीरादयस्तदा" ॥

आदिशब्दात् धर्म्मवीरदानवीरदेवताविषयरतिप्रभृतयः । तत्र देवताविषया रतिर्यथा ।

"कदा वाराणस्यामिह सुरधुनीरोधसि वसन्
वसानः कौपीनं शिरसि निदधानोऽञ्जलिपुटम् ।
अये गौरीनाथ त्रिपुरहर शम्भो त्रिनयन
प्रसीदेति क्रोशन्निमिषमिव नेष्यामि दिवसान्" ॥

अथ मुनीन्द्रोसम्मतो वत्सलः ।

२४१, स्फुटं चमत्कारितया वत्सलञ्च रसं विदुः ।
स्थायी वत्सलतास्नेहः पुत्राद्यालम्बनं मतम् ॥
उद्दीपनानि तच्चेष्टाविद्याशौर्य्यदयादयः ।
आलिङ्गनाङ्गसंस्पर्शशिरश्चुम्बनमीक्षणम् ॥
पुलकानन्दबाष्पाद्या अनुभावाः प्रकीर्त्तिताः ।
सञ्चारिणोऽनिष्टशङ्का हर्षगर्व्वादयो मत ॥
पद्मगर्भच्छविर्व्वर्णो दैवतं लोकमातरः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

"यदाह धात्र्या प्रथमोदितं वचो
ययौ तदीयामवलम्ब्य चाङ्गुलीम् ।
अभूच्च नम्रः प्रणिपातशिक्षया
पितुर्मुदं तेन ततान सोऽर्भकः" ॥

एषाञ्च रसानां परस्परविरोधमाह ।

२४२, आद्यः करुणबीभत्सरौद्रवीरभयानकैः ॥
भयानकेन करुणेनापि हास्यो विरोधभाक् ।
करुणो हास्यशृङ्गाररसाभ्यामपि तादृशः ॥
रौद्रस्तु हास्यशृङ्गारभयानकरसैरपि ।
भयानकेन शान्तेन तथा वीररसः स्मृतः ॥
शृङ्गारवीररौद्राख्यहास्यशान्तैर्भयानकः ।
शान्तस्तु वीरशृङ्गाररौद्रहास्यभयानकैः ॥
शृङ्गारेण तु बीभत्स इत्याख्याता विरोधिता ।

आद्यः शृङ्गारः । एषाञ्च समावेशप्रकारा वक्ष्यन्ते ।

२४३, कुतोऽपि कारणात् क्वापि स्थिरतामुपयन्नपि ॥
उन्मादादिर्नतु स्थायी पात्रेण स्थैर्य्यमेतियत् ।

यथा । विक्रमोर्व्वश्यां चतुर्थेऽङ्के पुरूरवस उन्मादः ।

२४४, रसभावौ तदाभासौ भावस्य प्रशमोदयौ ॥
सन्धिः शबलता चेति सर्व्वेऽपि रसनाद्रसाः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रसधर्म्मयोगित्वाद्भावादिष्वपि रसत्वमुपचारादि-त्यभिप्रायः । भावादय उच्यन्ते ।

२४५, सञ्चारिणः प्रधानानि देवादिविषया रतिः॥
उद्बुद्धमात्रः स्थायी च भाव इत्यभिधीयते ।

"न भावहीनोऽस्ति रसो न भावो रसवर्ज्जितः ।
परस्परकृत्या सिद्धिरनयोरेसभावयोः" ॥

इत्युक्तदिशा परमालोचनया परमविश्रान्तिस्थानेन रसेन सहैव वर्त्तमाना अपि राजानुगतविवाहप्रवृत्तभृत्य-वद् आपाततो यत्र प्राधान्येनाभिव्यक्ता व्यभिचारिणो देवमुनिगुरुनृपादिविषया रतिः उद्बुद्धमात्रा विभावा-दिभिरपरिपुष्टतया रसतामनापाद्यमानाश्च स्थायिनो भावा भावशब्दवाच्याः। तत्र व्यभिचारी यथा "एवं वादिनि देवर्षावित्यादि"। अत्रावहित्था । देवविषया रतिः । यथा कुन्दमालायाम् ॥

"दिवि वा भुवि वा ममास्तु वासो
नरके वा नरकान्तक प्रकामम् ।
अवधीरितशारदारविन्दौ
चरणौ ते मरणेऽपि चिन्तयामि" ॥

मुनिविषया रतिर्यथा ।

"विलोकनेनैव तवाऽमुना मुने
कृतः कृतार्थोऽस्मि निवर्हितांहसा ।
तथापि शुश्रूषुरहं गरीयसी-
र्गिरोऽथवा श्रेयसि केन तृप्यते" ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

राजविषया रतिर्यथा मम ।

"त्वद्वाजिराजिनिर्द्धूतधूलीपटलपङ्किलाम् ।
न धत्ते शिरसा गङ्गां भूरिभारभिया हरः" ॥

एवमन्यत् ।

उद्बुद्धमात्रस्थायी भावो यथा ।

"हरस्तु किञ्चित्परिवृत्तधैर्य्यश्चन्द्रोदयारम्भ इवाम्बुराशिः।
उमामुखे बिम्बफलाधरोष्ठे व्यापारयामास विलोचनानि"॥

अत्र पार्व्वतीविषया भगवतो रतिः ॥ ननूक्तं "प्रधानकरसवद्विभावादीनामेकोऽवभासो रस इति" तत्र सञ्चारिणः पार्थक्याभावात् कथं प्राधान्येनाभिव्यक्तिरित्युच्यते ।

२४६, यथा मरीचखण्डादेरेकीभावेऽपिपानके ।
उद्रेकः कस्यचित् क्वापि तथा सञ्चारिणोरसे॥

अथ रसाभासभावाभासौ ।

२४७, अनौचित्यप्रवृत्तत्वे आभासो रसभावयोः ॥

अनौचित्यञ्चात्र रसानां भरतादिप्रणीतलक्षणानां सामग्रीरहितत्वे सत्येकदेशयोगित्वोपलक्षणपरं बोध्यं तच्च बालव्युत्पत्तये एकदेशतो दर्श्यते ।

२४८, उपनायकसंस्थायां मुनिगुरुपत्नीगतायाञ्च ।
बहुनायकविषयायां रतौ तथाऽनुभयनिष्ठायाम्॥
प्रतिनायकनिष्ठत्वे तद्वदधमपात्रतिर्य्यगादिगते ।
शृङ्गारेऽनौचित्यं रौद्रे गुर्व्वादिगतकोपे ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शान्ते च हीननिष्ठे गुर्वाद्यालम्बने हास्ये ।
ब्रह्मवधाद्यत्साहेऽधमपात्रगते तथा वीरे ॥
उत्तमपात्रगतत्वे भयानके ज्ञेयमेवमन्यत्र ।

तत्र रतेरुपनायकनिष्ठत्वे यथा मम ।

"स्वामी मुग्धतरो वनं घनमिदं बालाहमेकाकिनी
क्षोणीमाटणुते तमालमलिनच्छायातमःसन्ततिः ।
तन्मे सुन्दर मुञ्च कृष्ण सहसा वर्त्मेति गोप्या गिरः
श्रुत्वा तां परिरभ्य मन्मथकलासक्तो हरिः पातु वः"।

वक्रनायकनिष्ठत्वे यथा ।

"कान्तास्त एव भुवनत्रितयेऽपि मन्ये
येषां कृते सुतनु पाण्डुरयं कपोलः" ॥

अनुभयनिष्ठत्वे यथा । मालतीमाधवे नन्दनस्य मालत्याम् ।
"पश्चादुभयनिष्ठत्वेऽपि प्रथममेकनिष्ठत्वे रतेराभासत्वम्"
इति श्रीमल्लोचनकाराः ॥

तत्रोदाहरणं यथा रत्नावल्याम् । सागरिकाया अन्योन्य-
दर्शनात् प्राक् वत्सराजे रतिः ॥

प्रतिनायकनिष्ठत्वे यथा । हयग्रीववधे हयग्रीवस्य ज-
लक्रीडावर्णने ।

अधमपात्रगतत्वे यथा ।

"जघनस्थलनद्धपत्रवल्लीगिरिमल्लीकुसुमानि कापि भिल्ली।
अवचित्य गिरौ पुरो निषण्णा स्वकचानुत्कचयाञ्चकार भर्त्रा"॥

तिर्य्यग्गतत्वे यथा ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

"मल्लीमतल्लीषु वनान्तरेषु वल्लप्रन्तरे वल्लभमाह्वयन्ती ।
चञ्चद्विपञ्चीकलनादभङ्गी सङ्गीतमङ्गीकुरुते स्म भङ्गी"॥

आदिशब्दात्तापसादयः । रौद्राभासो यथा ।

"रक्तोत्फुल्लविशाललोलनयनः कम्पोत्तराङ्गो मुहु-
र्मुक्ता कर्णमपेतभीर्धृतधनुर्बाणो हरेः पश्यतः ।
आधमातः कटुकोक्तिभिः स्वमसकृद्दोर्विक्रमं कीर्त्तय-
न्नंसास्फोटपटुर्युधिष्ठिरमसौ हन्तुं प्रविष्टोऽर्जुनः"॥

भयानकाभासो यथा ।

"अशक्नुवन् सोढुमधीरलोचनः सहस्ररश्मेरिव यस्य दर्शनम्।
प्रविश्य हेमाद्रिगुहाग्टहान्तरं निनाय बिभ्यद्दिवसानि
कौशिकः"॥

स्त्रीनीचविषयमेव हि भयं रसप्रकृतिः । एवमन्यत्र ।

२४८, भावाभासो लज्जादिके तु वेश्यादिविषये स्यात्
स्पष्टम् ।

२४९, भावस्य शान्तावुदये सन्धिमिश्रेतयोः क्रमात्।
भावस्य शान्तिरुदयः सन्धिः शबलता मता॥

क्रमेण यथा ।

"सुतनु जहिहि कोपं पश्य पादानतं मां
न खलु तव कदाचित्कोप एवंविधोऽभूत् ।
इति निगदति नाथे तिर्य्यगामीलिताक्ष्या
नयनजलमनल्पं मुक्तमुक्तं न किञ्चित्" ॥

अत्र वाष्पमोचनेनेर्ष्याख्यसञ्चारिभावस्य शमः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

"चरणपतनप्रत्याख्यानात् प्रसादपराङ्मुखे
निभृतकितवाचारेत्युक्त्वा रुषा परुषीकृते ।
व्रजति रमणे निःश्वस्योच्चैः स्तनस्थितहस्तया
नयनसलिलच्छन्ना दृष्टिः सखीषु निवेशिता" ॥

अत्र विषादस्योदयः ।

"नयनयुगासेचनकं मानसवृत्त्यापि दुष्प्रापम् ।
रूपमिदं मदिराक्ष्या मदयति हृदयं दुनोति च मे" ॥

अत्र हर्षविषादयोः सन्धिः ।

"क्व कार्य्यं शशलक्ष्मणः क्व च कुलं भूयोऽपि दृश्येत सा
दोषाणां प्रशमाय मे श्रुतमहो कोपेऽपि कान्तं मुखम् ।
किं वक्ष्यन्त्यपकल्मषाः कृतधियः स्वप्नेऽपि सा दुर्लभा
चेतः स्वास्थ्यमुपैहि कः खलु युवा धन्योऽधरं धास्यति" ॥

अत्र वितर्कौत्सुक्यमतिस्मरणशङ्कादैन्यधृतिचिन्तानां शबलता ॥ * ॥

इति साहित्यदर्पणे रसभावादिनिरूपणो नाम
तृतीयः परिच्छेदः ॥ * ॥

अथ काव्यभेदमाह ।

२५०, काव्यं ध्वनिर्गुणीभूतव्यङ्ग्यश्चेति द्विधा मतम् ।

तत्र ।

२५१, वाच्यातिशयिनि व्यङ्ग्ये ध्वनिस्तत्काव्यमुत्तमम्

वाच्यादधिकचमत्कारिणि व्यङ्ग्यार्थे ध्वन्यतेऽस्मिन्निति व्युत्पत्त्या ध्वनिर्नामोत्तमं काव्यम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

२५२, भेदौ ध्वनेरपि द्वावुदीरितौ लक्षणाभिधामूला
अविवक्षितवाच्योऽन्योविवक्षितान्यपरवाच्यश्च॥

तत्राविवक्षितवाच्यो नाम लक्षणामूलो ध्वनिः । लक्षणामूलत्वादेवात्र वाच्यमविवक्षितं बाधितस्वरूपम् । विवक्षितान्यपरवाच्यस्त्वभिधामूलः । अत एवात्र वाच्यं विवक्षितम् । अन्यपरं व्यङ्ग्यनिष्ठम् । अत्र हि वाच्योऽर्थः स्वरूपं प्रकाशयन्नेव व्यङ्ग्यार्थस्य प्रकाशकः । यथा प्रदीपो घटस्य । अभिधामूलस्य बहुविषयतया पश्चान्निर्देशः । अविवक्षितवाच्यस्य भेदावाह ॥

२५३, अर्थान्तरं सङ्क्रमिते वाच्येऽत्यन्तं तिरस्कृते ।
अविवक्षितवाच्योऽपि ध्वनिर्द्वैविध्यमृच्छति ॥

अविवक्षितवाच्यो नाम ध्वनिरर्थान्तरसङ्क्रमितवाच्योऽत्यन्ततिरस्कृतवाच्यश्चेति द्विविधः । यत्र स्वयमनुपयुज्यमानो मुख्योऽर्थः स्वविशेषरूपेऽर्थान्तरे परिणमति तत्र मुख्यार्थस्य स्वविशेषरूपार्थान्तरसङ्क्रमितत्वादर्थान्तरसङ्क्रमितवाच्यत्वम् । यथा ।

"कदली कदली करभः करभः करिराजकरः करिराजकरः।
भुवनत्रितयेऽपि बिभर्त्ति तुलामिदमूरुयुगं न चमूरुदृशः"॥

अत्र द्वितीयकदल्यादिशब्दाः पौनरुक्त्यभिया सामान्यकदल्यादिरूपे मुख्यार्थेबाधिता जाड्याद्यादिगुणविशिष्टकदल्यादिरूपमर्थं बोधयन्ति जाड्याद्यतिशयश्च व्यङ्ग्यः । यत्र पुनः स्वार्थं सर्वथा परित्यजन्नर्थान्तरे परिणमति तत्र मु-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ख्यार्थस्यात्यन्ततिरस्कृतत्वादत्यन्ततिरस्कृतवाच्यत्वम्। यथा।

"निःश्वासान्ध इवादर्शश्चन्द्रमा न प्रकाशते" ॥

अत्रान्धशब्दो मुख्यार्थे बाधितोऽप्रकाशरूपमर्थं बोधयति अप्रकाशातिशयश्च व्यङ्ग्यः । अन्धत्वाप्रकाशत्वयोः सामान्यविशेषभावाभावान्नार्थान्तरसङ्क्रमितवाच्यत्वम् ॥ यथा ।

"भम धम्मिअ वीसत्थो सो सुणहो अज्ज मारिओ देण।

गोलाणईकच्छकुडङ्गवासिणा दरीअसीहेण" * ॥

अत्र भ्रम धार्म्मिकेत्यतो भ्रमणस्य विधिः प्रकृतेऽनुपयुज्यमानतया भ्रमणनिषेधे पर्य्यवस्यतीति विपरीतलक्षणाशङ्का न कार्य्या। यत्र खलु विधिनिषेधावुत्पद्यमानावेव निषेधविध्योः पर्य्यवस्यतस्तत्रैव तदवसरः। यत्र पुनः प्रकरणादिपर्य्यालोचनेन विधिनिषेधयोर्निषेधविधी अवगम्येते तत्र ध्वनित्वमेव। तदुक्तम् ॥

"क्वचिद्बाध्यतया ख्यातिः क्वचित्ख्यातस्य बाधनम् ।

पूर्व्वत्र लक्षणैव स्यादुत्तरत्राभिधैव तु" ॥

अत्राद्ये मुख्यार्थस्यार्थान्तरे सङ्क्रमणं प्रवेशः न तु तिरोभावः अत एवात्राजहत्स्वार्थलक्षणा। द्वितीये तु स्वार्थस्यात्यन्तं तिरस्कृतत्वाज्जहत्स्वार्था ॥

२५४, विवक्षिताभिधेयोऽपि द्विभेदः प्रथमं मतः।
असंलक्ष्यक्रमो यत्र व्यङ्ग्यो लक्ष्यक्रमस्तथा ॥

विवक्षितान्यपरवाच्योऽपि ध्वनिरसंलक्ष्यक्रमव्यङ्ग्यः संल-

---

* भम धम्मिअ इति । भ्रम धार्म्मिक विश्वस्तः स श्वाद्य मारितस्त्वया । गोदानदीकच्छकुञ्जवासिना दृप्तसिंहेन ॥ इति सं० ॥ टी० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

च्यक्रमव्यङ्ग्यश्चेति द्विविधः ।

२५५, तत्राद्यो रसभावादिरेक एवात्र गण्यते ।
एकोऽपि भेदोऽनन्तत्वात् सङ्ख्येयस्तस्य नैव यत् ॥

उक्तस्वरूपो रसभावादिरसंलक्ष्यक्रमव्यङ्ग्यः । अत्र व्यङ्ग्यप्रतीतेर्विभावादिप्रतीतिकारणकत्वात् क्रमोऽवश्यमस्ति किन्तु उत्पलपत्रशतव्यतिभेदवल्लाघवान्न संलक्ष्यते । एषु रसादिषु च एकस्यापि भेदस्यानन्तत्वात् सङ्ख्यातुमशक्यत्वादसंलक्ष्यक्रमव्यङ्ग्यध्वनिर्नाम काव्यमेकभेदमेवोक्तं । तथाहि एकस्यैव शृङ्गारस्य एकोऽपि सम्भोगरूपो भेदः परस्परालिङ्गनाधरपानचुम्बनादिभेदात् प्रत्येकञ्च विभावादिवैचित्र्यात् सङ्ख्यातुमशक्यः कागणनात सर्वेषाम् ॥

२५६, शब्दार्थोभयशक्त्युत्थव्यङ्ग्येऽनुस्वानसन्निभे ।
ध्वनिर्लक्ष्यक्रमव्यङ्ग्यस्त्रिविधः कथितो बुधैः ॥

क्रमलक्ष्यत्वादेवानुरणनरूपो यो व्यङ्ग्योऽस्य शब्दशक्त्युद्भवत्वेन अर्थशक्त्युद्भवत्वेन शब्दार्थशक्त्युद्भवत्वेनच त्रैविध्यात् संलक्ष्यक्रमव्यङ्ग्यनाम्नो ध्वनेः काव्यस्यापि त्रैविध्यम् । तत्र ।

२५७, वस्त्वलङ्काररूपत्वाच्छब्दशक्त्युद्भवो द्विधा ।

अलङ्कारशब्दस्य पृथगुपादानादनलङ्कारं वस्तुमात्रं गृह्यते । तत्र वस्तुरूपशब्दशक्त्युद्भवो व्यङ्ग्यो यथा ॥

"पन्थिअ न एत्थ सत्थरमत्थि मणं पत्थरत्थले गामे ।
उन्नअपओहरं पेक्खिअ उण जइ वससि ता वससु" * ॥

* पन्थिअ इति । पथिक नात्रास्तरोस्ति मनाक् प्रस्तरस्थले ग्रामे । उन्नतपयोधरं प्रेक्ष्य पुनर्यदिवससि तद्वस ॥ इति सं० ॥ टी० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अत्र सत्यरादिशब्दशक्त्या यद्युपभोगक्षमोऽसि तदास्स्वेति वस्तु व्यज्यते ।

अलङ्काररूपो यथा ॥ "दुर्गालङ्कितविग्रह इत्यादि"॥ अत्र प्राकरणिकस्य उमानाममहादेवीवल्लभभानुदेवनृपतेर्वर्णने द्वितीयार्थसूचितमप्राकरणिकस्य पार्वतीवल्लभस्य वर्णनमसम्बद्धं मा प्रसाङ्क्षीदितीश्वरभानुदेवयोरुपमानोपमेयभावः कल्प्यते । तदत्र उमावल्लभ उमावल्लभ इवेत्युपमालङ्कारो व्यङ्ग्यः । यथा वा ॥

"अमितः समितः प्राप्तैरुत्कर्षैर्हर्षदः प्रभो ।
अहितः सहितः साधुर्यशोभिरसतामसि" ॥

अत्रामित इत्यादावपिशब्दाभावाद्विरोधाभासो व्यङ्ग्यः । व्यङ्ग्यस्यालङ्कार्य्यत्वेऽपि ब्राह्मणश्रमणन्यायादलङ्कारत्वमुपचर्य्यते ॥

२५८, वस्तु वालङ्कृतिर्व्वापि द्विधार्थःसम्भवी स्वतः।
कवेः प्रौढोक्तिसिद्धो वा तन्निबद्धस्य चेति षट् ॥
षड्भिस्तैर्व्यज्यमानस्तु वस्त्वलङ्काररूपकः ।
अर्थशक्त्युद्भवो व्यङ्ग्यो याति द्वादशभेदताम् ॥

स्वतःसम्भवी औचित्याद्बहिरपि सम्भाव्यमानः । प्रौढोक्त्या सिद्धो न त्वौचित्येन । तत्र क्रमेण यथा ॥

"दृष्टिं हे प्रतिवेशिनि क्षणमिहाप्यस्मद्गृहे दास्यसि
प्रायेणास्य शिशोः पिता न विरसाः कौपीरपः पास्यति।
एकाकिन्यपि यामि सत्वरमितः स्रोतस्तमालाकुलं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नीरन्ध्रास्तनुमालिखन्तु जरठच्छेदानलग्रन्थयः" ॥

अनेन स्वतः सम्भविना वस्तुमात्रेण एतत्प्रतिपादिकायामावि परपुरुषोपभोगजनखचतादिगोपनरूपं वस्तुमात्रं व्यज्यते॥

"दिशि मन्दायते तेजो दक्षिणस्यां रवेरपि।
तस्यामेव रघोः पाण्ड्याः प्रतापं न विषेहिरे" ॥

अनेन स्वतः सम्भविना वस्तुना रवितेजसो रघुप्रतापोऽधिक इति व्यतिरेकालङ्कारो व्यज्यते ॥

"आपतन्तममुं दूरादरीकृतपराक्रमः।
बलोऽवलोकयामास मातङ्गमिव केसरी" ॥

अत्रोपमालङ्काररूपेण स्वतः सम्भविना व्यञ्जकार्थेन बलदेवः क्षणेनैव वेणुदारिणः क्षयं करिष्यतीति वस्तु व्यज्यते॥

"गाढकान्तदशनक्षतव्यथासङ्कटादरिवधूजनस्य यः।
ओष्ठविद्रुमदलान्यमोचयन्निर्दशन् युधि रुषा निजाधरम्"॥

अत्र स्वतः सम्भविना विरोधालङ्कारेणाधरो निर्दष्टः शत्रवो व्यापादिताश्चेति समुच्चयालङ्कारो व्यङ्ग्यः॥

"सज्जेइ सुरहिमासो ण आपणेइ जुअइजनलक्खसहे।
अहिणअसहआरमुहे णअपल्लवपत्तणे अनङ्गस्स शरे"*॥

अत्र वसन्तः शरकारः कामो धन्वी युवतयो लक्ष्यं पुष्पाणि शरा इति कविप्रौढोक्तिसिद्धं वस्तु प्रकाशीभवन्मदनविजृम्भणरूपं वस्तु व्यनक्ति ॥

---

* सज्जेइ इति। सज्जयति सुरभिमासो न चानयति युवतिजनलक्ष्यसहान्। अभिनवसहकारमुखान् नवपल्लवपत्तनानङ्गस्य शरान्॥ इति सं०॥ टी०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

"रजनीषु विमलभानोः करजालेन प्रकाशितं वीर ।
धवलयति भुवनमण्डलमखिलं तव कीर्त्तिसन्ततिः सततम्"

अत्र कविप्रौढोक्तिसिद्धेन वस्तुना कीर्त्तिसन्ततेश्चन्द्रकर-जालादधिककालप्रकाशकत्वेन व्यतिरेकालङ्कारो व्यङ्ग्यः ॥

"दशाननकिरीटेभ्यस्तत्क्षण राक्षसश्रियः ।
मणिव्याजेन पर्य्यस्ताः पृथिव्यामश्रुबिन्दवः" ॥

अत्र कविप्रौढोक्तिसिद्धेनापह्नुत्यलङ्कारेण भविष्यद्राक्षस-श्रीविनाशरूपं वस्तु व्यज्यते ॥

"धम्मिल्ले नवमल्लिकासमुदयो हस्ते सिताम्भोरुहं
हारः कण्ठतटे पयोधरयुगे श्रीखण्डलेपो घनः ।
एकोऽपि त्रिकलिङ्गभूमितिलक त्वत्कीर्त्तिराशिर्यथौ
नानामण्डनतां पुरन्दरपुरीवामभ्रुवां विग्रहे" ॥

अत्र कविप्रौढोक्तिसिद्धेन रूपकालङ्कारेण "भूमिष्ठोऽपि स्वर्गस्थानामुपकारं करोषीति" विभावनालङ्कारो व्यज्यते ॥

"शिखरिणिक्कनुनामकियच्चिरंकिमभिधानमसावकरोत्तपः ।
सुमुखि येन तवाधरपाटलं दशति बिम्बफलं शुकशावकः" ॥

अत्रानेन कविनिबद्धस्य कस्यचित् कामिनः प्रौढोक्तिसिद्धेन वस्तुना तवाधरः पुण्यातिशयलभ्य इति वस्तु प्रतीयते ।

"सुभगे कोटिसङ्ख्यत्वमुपेत्य मदनाशुगैः ।
वसन्ते पञ्चता त्यक्ता पञ्चतासीद्वियोगिनाम्" ॥

अत्र कविनिबद्धवक्तृप्रौढोक्तिसिद्धेन कामशराणां कोटि-सङ्ख्यत्वप्राप्त्या निखिलवियोगिमरणेन वस्तुना शराणां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पञ्चता शरान् विमुच्य वियोगिनः श्रितेत्युत्प्रेक्षालङ्कारो व्यज्यते ॥

"मल्लिकामुकुले चण्डि भाति गुञ्जन्मधुव्रतः ।
प्रयाणे पञ्चबाणस्य शङ्खमापूरयन्निव" ॥

अत्र कविनिबद्धवक्तृप्रौढोक्तिसिद्धेन उत्प्रेक्षालङ्कारेण कामस्यायमुन्मादकः कालः प्राप्तस्तत्कथं "नानिनिं मानं न मुञ्चसीति" वस्तु व्यज्यते ॥

"महिलासहस्सभरिए तुह हिअअे सुहअ सा अमाअन्ती ।
अणुदिणमणण्णमणा अङ्गं अलुअं पि तणुएइ" * ॥

"अलामाअन्तीति" कविनिबद्धवक्तृप्रौढोक्तिसिद्धेन काव्यलिङ्गालङ्कारेण तनोस्तनूकरणेऽपि तव हृदये न वर्त्तत इति विशेषोक्त्यलङ्कारो व्यज्यते । न खलु कवेः कविनिबद्धस्येव रागाद्याविष्टता । अतः कविनिबद्धवक्तृप्रौढोक्तिः कविप्रौढोक्तेरधिकं सहृदयचमत्कारिणीति पृथक्प्रतिपादिता । एषु च अलङ्कृतिव्यञ्जनस्थले रूपेणोत्प्रेक्षणव्यतिरेचनादिमात्रस्य प्राधान्यं सहृदयसंवेद्यं न तु रूप्यादीनामित्यलङ्कृतेरेव मुख्यत्वम् ॥

२५९, एकः शब्दार्थशक्त्युत्थे

उभयशक्त्युद्भवे व्यङ्ग्ये एकोध्वनेर्भेदः । यथा ।

"हिमसुक्तचन्द्रकाचरः सपद्मको
मदयन् द्विजान् जनितमीनकेतनः ।

---

* महिलासहस्स इति । महिलासहस्रभरिते तव हृदये सुभग सा अमानी । अनुदिनमनन्यमना अङ्गं तनुकमपि तनूकरोति ॥ इति ॥ सं० ॥ टी० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अभवत्प्रमादितसुरो महोत्सवः
प्रमदाजनस्य स चिराय माधवः" ॥

अत्र माधवः कृष्णो माधवो वसन्त इत्युपमालङ्कारो व्यङ्ग्यः॥ एवञ्च व्यङ्ग्यभेदादेव व्यञ्जकानां काव्यानां भेदः ।

२६०, तदष्टादशधा ध्वनिः ।

अविवक्षित वाच्योऽर्थान्तरसङ्क्रमितवाच्योऽत्यन्ततिरस्कृतवाच्यश्चेति द्विविधः। विवक्षितान्यपरवाच्यस्तु असंलक्ष्यक्रमव्यङ्ग्यत्वेनैकः। संलक्ष्यक्रमव्यङ्ग्यवाच्यत्वेन च शब्दार्थोभयशक्तिमूलतया पञ्चदशेति अष्टादशभेदो ध्वनिः। एषु च ।

२६१, वाक्ये शब्दार्थशक्त्युत्थस्तदन्ये पदवाक्ययोः ॥

तत्र अर्थान्तरसङ्क्रमितवाच्यो ध्वनिः पदगतो यथा ॥

"धन्यः स एव तरुणो नयने तस्यैव नयने च ।
युवजनमोहनविद्या भवितेयं यस्य सम्मुखे सुमुखी"॥

अत्र द्वितीयनयनशब्दो भाग्यवत्तादिगुणविशिष्टनयनपरः । वाक्यगतो यथा ।

"त्वामस्मि वच्मि विदुषां समुदायोऽत्र तिष्ठति ।
आत्मीयां मतिमादाय स्थितिमत्र विधेहि तत्" ॥

अत्र प्रतिपाद्यस्य सम्मुखीनत्वादेव लब्धे प्रतिपाद्यत्वे "त्वामिति" पुनर्व्वचनमन्यव्यावृत्तिविशिष्टं त्वदर्थं लक्षयति । एवं वच्मीत्यनेनैव कर्त्तरि लब्धे "अस्मीति" पुनर्व्वचनमन्यव्यावृत्तिविशिष्टं मदर्थं लक्षयति । तथा "वि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दुषां समुदाय" इत्यादिवचनेनैव वक्तुः प्रतिपादने सिद्धे पुनः "वच्मीति" वचनं "उपदिशामि" इति वचनविशेषरूपमर्थं लक्षयति। एतानि च लक्षितानि स्वातिशयं व्यञ्जयन्ति। एतेन मम वचनं तवात्यन्तं हितं तदवश्यमेतत् कर्त्तव्यमित्यभिप्रायः। तदेवमयं वाक्यगतोऽर्थान्तरसङ्क्रमितवाच्यो ध्वनिः। अत्यन्ततिरस्कृतवाच्यः पदगतो यथा॥ "निश्वासान्ध इवेत्यादि"। वाक्यगतो यथा॥ "उपकृतं बहु तत्रेत्यादि" अन्येषां वाक्यगतत्वे उदाहृतम्। पदगतत्वे यथा।

"लावण्यं तदसौ कान्तिस्तद्रूपं स वचः क्रमः।
तदा सुधास्यदमभूदधुना तु ज्वरो महान्॥

अत्र लावण्यादीनां तादृगनुभवैकगोचरताव्यञ्जकानां तदादिशब्दानामेव प्राधान्यम्। अन्येषान्तु तदुपकारित्वमेवेति तन्मूल एव ध्वनिव्यपदेशः। तदुक्तं ध्वनिकृता।

"एकावयवसंस्थेन भूषणेनेव कामिनी।
पदद्योतेन सुकवेर्ध्वनिना भाति भारती॥

एवं भावादिष्वप्यूह्यम्।

"भक्तिमुक्तिकृदेकान्तसमादेशनतत्परः।
कस्य नानन्दनिस्यन्दं विदधाति सदागमः"।

अत्र सदागमशब्दः सन्निहितमुपनायकं प्रति सच्छास्त्रार्थमभिधाय "सतः पुरुषस्यागमः" इति वस्तु व्यनक्ति॥ ननु "सदागमः सदागम इवेति" न कथमुपमाध्वनिः। सदागमशब्दप्रयोगोपमानोपमेयभावाविवक्षणाद्रहस्यसं-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गोपनार्थमेव हि द्व्यर्थपदप्रतिपादनं प्रकरणादिपर्य्यालोचनेन च सच्छास्त्राभिधानसम्बन्धत्वात् ।

"अनन्यसाधारणधीर्धृताखिलवसुन्धरः ।
राजते कोऽपि जगति स राजा पुरुषोत्तमः" ॥

अत्र पुरुषश्रेष्ठः पुरुषोत्तम इत्युपमाध्वनिः। अनयोः शब्द शक्तिमूलौ संलक्ष्यक्रमभेदौ ॥

सायं स्नानमुपासितं मलयजेनाङ्गं समालेपितं
यातोऽस्ताचलमौलिमस्वरमणिर्विश्रब्धमत्रागतिः।
आश्चर्यं तव सौकुमार्य्यमतिभिः क्लान्ताऽसि येनाधुना
नेत्रद्वन्द्वमनीलनव्यतिकरं शक्नोति तेनासितुम्"॥

अत्र स्वतःसम्भविना वस्तुना कृतपरपुरुषपरिचया स्नाताऽसीति वस्तु व्यज्यते । तच्चाधुना क्लान्ताऽसि न तु पूर्वं कदाचिदपि तवैवंविधः क्लमो दृष्टः इति बोधयतोऽधुना पदस्यैवेतरपदार्थोत्कर्षादधुना पदस्यैव पदान्तरापेक्षया वैशिष्ट्यम् ।

"तदप्राप्तिमहादुःखविलीनाशेषपातका ।
तच्चिन्ताविपुलाह्लादक्षीणपुण्यचया तथा ॥
चिन्तयन्ती जगत्सूतिं परं ब्रह्मस्वरूपिणम् ।
निरुच्छ्वासतया मुक्तिं गताऽन्या गोपकन्यका" ॥

अत्राशेषचयपदप्रभावादनेकजन्मसहस्रभोग्यदुष्कृतसुकृतफलराशितादात्म्याध्यवसिततया भगवद्विरहदुःखचिन्ताह्लादयोः प्रत्यायनमित्यतिशयोक्तिद्वयप्रतीतिरशेषचयपदद्वयद्योत्या । अत्र च व्यञ्जकस्य प्रौढोक्तिमन्तरेणापि सम्भवात्स्वतः सम्भविता ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

"पश्यस्यसङ्ख्यपथगां त्वद्दानजलवाहिनीम् ।
देव त्रिपथगात्मानं गोपयत्युग्रमूर्द्धनि" ॥

इदं मम । अत्र "पश्यन्तीति" कविप्रौढोक्तिसिद्धेन काव्यलिङ्गालङ्कारेण न केऽप्यन्ये दातारस्तव सदृशा इति व्यतिरेकालङ्कारोऽसङ्ख्यपदद्योत्यः । एवमन्येष्वप्यर्थशक्तिमूलसंलक्ष्यक्रमभेदेषूदाहार्य्यम् । तदेवं ध्वनेः पूर्व्वोक्तेष्वष्टादशसु भेदेषु मध्ये शब्दार्थशक्त्युत्थो व्यङ्ग्यो वाक्यमात्रे भवन्नेकः । अन्ये पुनः सप्तदश वाक्ये पदे चेति चतुस्त्रिंशदिति पञ्चत्रिंशद्भेदाः ॥

२६२, प्रबन्धेऽपि मतो धीरैरर्थशक्त्युद्भवो ध्वनिः ।

प्रबन्धो महावाक्यम् । अनन्तरोक्तद्वादशभेदोऽर्थशक्त्युत्थः । यथा महाभारते गृध्रगोमायुसंवादे ॥

"अलं स्थित्वा श्मशानेऽस्मिन् गृध्रगोमायुसङ्कुले ।
कङ्कालबहुले घोरे सर्व्वप्राणिभयङ्करे ॥
न चेह जीवितः कश्चित् कालधर्म्ममुपागतः ।
प्रियो वा यदि वा द्वेष्यः प्राणिनां गतिरीदृशी" ॥

इति दिवसे शक्रस्य गृध्रस्य श्मशाने मृतं बालमुपादाय तिष्ठतां दिवसे तं परित्यज्य गमनमिष्टम् ॥

"आदित्योऽयं स्थितो मूढाः स्नेहं कुरुत साम्प्रतम् ।
बहुविघ्नो मुहूर्त्तोऽयं जीवेदपि कदाचन ॥
अमुं कनकवर्णाभं बालमप्राप्तयौवनम् ।
गृध्रवाक्यात् कथं बालास्त्यजध्वमविशङ्किताः" ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इति निशि समर्थस्य गोमायोर्दिवसे परित्यागोऽनभिलषित इति वाक्यसमूहेन द्योत्यते । अत्र स्वतः सम्भवी व्यञ्जकः । एवमन्येष्वेकादशभेदेषूदाहार्य्यम् ॥ एवं वाच्यार्थव्यञ्जकत्वे उदाहृतम् । लक्ष्यार्थस्य यथा । "निःशेषच्युतचन्दनमित्यादि" । व्यङ्ग्यार्थस्य यथा । "उग्र गिञ्चलेत्यादि"। अनयोः स्वतःसम्भविनौ लक्ष्यव्यङ्ग्यार्थौ व्यञ्जकौ । एव मन्येष्वेकादशभेदेषूदाहार्य्यम् ॥

२।२, पदांशवर्णरचनाप्रबन्धेष्वस्फुटक्रमः।
असंलक्ष्यक्रमव्यङ्ग्यो ध्वनिस्तत्र पदांशकः॥

प्रकृतिप्रत्ययोपसर्गनिपातादिभेदादनेकविधः । यथा ।

"चलापाङ्गां दृष्टिं स्पृशसि बहुशो वेपथुमतीं
रहस्याख्यायीव स्वनसि मृदु कर्णान्तिकचरः ।
करं व्याधुन्वत्याः पिबसि रतिसर्वस्वमधरं
वयं तत्त्वान्वेषान्मधुकर हतास्त्वं खलु कृती"॥

अत्र "हता" इति न पुनर्दुःखं प्राप्तवन्त इति हन् प्रकृतेः। "मुहुरङ्गुलिसंदष्टताधरौष्ठं प्रतिषेधाक्षरविह्वलाभिरामम् । मुखमंसविवर्त्तिपक्ष्मलाक्ष्याः कथमप्युन्नमितं न चुम्बितन्तु"॥

अत्र "तु" इति निपातस्यानुतापव्यञ्जकत्वम् । "न्यक्कारो ह्ययमेव मे यदरय इत्यादौ"। "अरय" इति बहुवचनस्य "तापस" इत्येकवचनस्य "अत्रैवेति" सर्वनाम्नः "निहन्तीति" "जीवतीति" च तिङः "अहो" इत्यव्ययस्य "ग्रामटिकेति" कारूपतद्धितस्य "विलुण्ठनेति" व्युपसर्गस्य "भुजैरिति" बहुवचनस्य व्यञ्जकत्वम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

"आहारे विरतिः समस्तविषयग्रामे निवृत्तिः परा
नासाग्रे नयनं तदेतदपरं यच्चैकतानं मनः ।
मौनञ्चेदमिदञ्च शून्यमधुना यद्विश्वमाभाति ते
तद्ब्रूयाः सखि योगिनी किमसि भोः किं वा वियोगिन्यसि"॥

अत्र तु "आहार इति" विषयसप्तम्या "समस्तेति" "परेति" च विशेषणद्वयस्य "मौनं चेदमिति" प्रत्यक्षपरामर्शिनः सर्वनाम्नः "आभातीति" उपसर्गस्य "सखीति" प्रणयस्मारणस्य "असि भोः" इति सोपहासोल्लासस्य "किंवा" इत्युत्तरपक्षदार्ढ्यसूचकस्य वाशब्दस्य "असीति वर्त्तमानोपदेशस्य तत्तद्विशेषव्यञ्जकत्वं सहृदयसंवेद्यम् । वर्णरचनयोरुदाहरिष्यते । प्रबन्धे महाभारते शान्तः । रामायणे करुणः मालतीमाधवरत्नावल्यादौ शृङ्गारः । एवमन्यत्र ॥

२६४, तदेवमेकपञ्चाशद्भेदास्तस्य ध्वनेर्मताः ।
सङ्करेण त्रिरूपेण संसृष्ट्या चैकरूपया ॥
वेदखाग्निशराः शुद्धैरिषुवाणाग्निसायकाः ।

शुद्धैः शुद्धभेदैरेकपञ्चाशता योजनेत्यर्थः । दिङ्मात्रं तूदाह्रियते ।

"अत्युन्नतस्तनयुगा तरलायताक्षी
द्वारि स्थिता तदुपयानमहोत्सवाय ।
सा पूर्णकुम्भनवनीरजतोरणस्रक्
सम्भारमङ्गलमयत्नकृतं विधत्ते" ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अत्र "स्तनावेव पूर्णकुम्भौ दृश्य एव नवनीरजस्रज इति" रूपकध्वनिरसध्वन्योरेकाश्रयानुप्रवेशः सङ्करः ।

"धुन्वन्त्यमूनि मदमूर्च्छदलिध्वनीनि
धूताध्वनीनहृदयानि मधोर्दिनानि ।
निस्तन्द्रचन्द्रवदनावदनारविन्द-
सौरभ्यसौहृदसगर्व्वसमीरणानि" ॥

अत्र निस्तन्द्रेत्यादिलक्षणामूलध्वनीनां संसृष्टिः ॥ अथ गुणीभूतव्यङ्ग्यम् ।

२६५, अपरन्तु गुणीभूतव्यङ्ग्यं वाच्यादनुत्तमे व्यङ्ग्ये॥

अपरं काव्यम् । अनुत्तमत्वं न्यूनतया साम्येन च सम्भवति ।

२६५,

तत्र स्यादितराङ्गं काक्वाक्षिप्तञ्च वाच्यसिद्ध्यङ्गम्
सन्दिग्धप्राधान्यं तुल्यप्राधान्यमस्फुटमगूढम् ॥
व्यङ्ग्यमसुन्दरमेवं भेदास्तस्योदिता अष्टौ ।

इतरस्य रसादेरङ्गं रसादिव्यङ्ग्यं यथा ।

"अयं स रसनोत्कर्षी पीनस्तनविमर्द्दनः ।
नाभ्यूरुजघनस्पर्शी नीवीविस्रंसनः करः"॥

अत्र शृङ्गारः करुणस्याङ्गम् ।

"मानोन्नतां प्रणयिनीमनुनेतुकाम-
स्त्वत्सैन्यसागररवोद्गतकर्णतापः ।
हा हा कथं नु भवतो रिपुराजधानी-
प्रासादसन्ततिषु तिष्ठति कामिलोकः" ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अतौत्सुक्यत्रासस्सन्धिसंस्कृतस्य करुणस्य राजविषयरतावङ्गभवाः।

"अनस्याने भ्रान्तं कनकमृगतृष्णान्वितधिया
वचो वैदेहीति प्रतिपदमुदस्रु प्रलपितम्।
कृता लङ्काभर्त्तुर्व्वदनपरिपाटीषु घटना
मयाप्तं रामत्वं कुशलवसुता न त्वधिगता"॥

अत्र रामत्वं प्राप्तमित्यवचनेऽपि शब्दशक्तेरेव रामत्वमवगम्यते। वचनेन तु सादृश्यहेतुकतादात्म्यारोपणमाविष्कुर्व्वता तद्गोपनमपाकृतम्। तेन वाच्यं सादृश्यं वाक्यार्थान्वयोपपादकतया ऽङ्गतां नीतम्। काक्वा चिह्नं यथा।

"मथ्नामि कौरवशतं समरे न कोपाद्
दुःशासनस्य रुधिरं न पिबाम्युरस्तः।
संचूर्णयामि गदया न सुयोधनोरू
सन्धिं करोतु भवतां नृपतिः पणेन"॥

अत्र "मथ्नाम्येवेत्यादि" व्यङ्ग्यं वाच्यस्य निषेधस्य सह भावेनैव स्थितम्।

"दीपयन् रोदसीरन्धमेष ज्वलति सर्व्वतः।
प्रतापस्तव राजेन्द्र वैरिवंशदवानलः"॥

अत्रान्वयस्य वैगुण्यारोपणरूपो व्यङ्ग्यः। प्रतापस्य दवानलत्वारोपसिद्ध्यङ्गम्। "हरस्तु किञ्चित् परिवृत्तेत्यादौ" विलोचनव्यापारचुम्बनाभिलाषयोः प्राधान्ये सन्देहः॥

"ब्राह्मणातिक्रमत्यागो भवतामेव भूतये।
जामदग्न्यश्च वो मित्रमन्यथा दुर्म्मनायते"॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अत्र परशुरामो रक्षःकुलक्षयं करिष्यतीति व्यङ्ग्यस्य वाच्यस्य च समं प्राधान्यम् ।

"सन्धौ सर्व्वस्वहरणं विग्रहे प्राणनिग्रहः ।
अत्वापदीनृपतौ न सन्धिर्न च विग्रहः" ॥

अत्रात्वापदीनाख्ये नृपतौ दानादिमन्तरेण नान्यः प्रशमोपायः व्यङ्ग्यं व्युत्पन्नानामपि झटित्यस्फुटम् ।

"अनेन लोकगुरुणा सतां धर्म्मोपदर्शिना ।
अहं व्रतवती स्वैरमुक्तेन किमतः परम्" ॥

अत्र प्रतीयमानोऽपि शाक्यमुनेस्तिर्य्यक्त्वोक्तिः बलात्कारोपभोगः स्फुटतया वाच्यायमान इत्यगूढम् ।

"वाणीरकुडुङ्गुडीणसउणिकोलाहलं सुणन्तीए ।
घरकम्मवावडाए वहूए सीअन्ति अङ्गाइ"* ॥

अत्र दत्तसङ्केतः कश्चिल्लताग्टहं प्रविष्ट इति व्यङ्ग्यात् "सीदन्त्यङ्गानि" इति वाच्यस्य चमत्कारः सहृदयसंवेद्य इत्यसुन्दरम् । किञ्च यो दीपकतुल्ययोगितादिषु उपमाद्यलङ्कारो व्यङ्ग्यः स गुणीभूतव्यङ्ग्य एव । काव्यस्य दीपकादिमुखेनैव चमत्कारविधायित्वात् । तदुक्तं ध्वनिकृता ।

"अलङ्कारान्तरस्यापि प्रतीतौ यत्र भासते ।
तत्परत्वं न काव्यस्य नासौ मार्गो ध्वनेर्म्मतः" ॥

---

* वाणीर इति । वाणीरकुञ्जोड्डीनशकुनिकोलाहलं शृण्वन्त्याः । ग्टहकर्म्मव्याप्टताया वध्वाः सीदन्ति अङ्गानि ॥ सं० ॥ कुडुङ्गो लताग्टहमिति चण्डीदासः ॥ टी० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यत्र च शब्दान्तरादिना गोपनकृतचारुत्वस्य विपर्य्यासः। यथा।

"दृष्टा केशवगोपरागहृतया किञ्चिन्न दृष्टं मया
तेनात्र स्खलिताऽस्मि नाथ पतितां किं नाम नालम्बसे।
एकस्त्वं विषमेषु खिन्नमनसां सर्व्वाबलानां गति-
र्गोप्यैवं गदितः सलेशमवताद्गोष्ठे हरिर्वश्चिरम्"॥

अत्र गोपरागादिशब्दानां गोपे राग इत्यादिव्यङ्ग्यार्थानां "सलेशमिति" पदेन स्फुटतयावभासः। सलेशमितिपदस्य परित्यागे ध्वनिरेव। किञ्च यत्र वस्त्वलङ्काररसादिरूपव्यङ्ग्यानां रसाभ्यन्तरे गुणीभावः तत्र प्रधानकृत एव काव्यव्यवहारः। तदुक्तं तेनैव।

"प्रकारोऽयं गुणीभूतव्यङ्ग्योऽपि ध्वनिरूपताम्।
धत्ते रसादितात्पर्य्यपर्य्यालोचनया पुनरिति"॥

यत्र च।

"यत्रोन्मदानां प्रमदाजनानामभ्यंलिहः शोणमणीमयूखैः।
सन्ध्याभ्रमं प्राप्नुवतामकाण्डेऽप्यनङ्गनेपथ्यविधिं व्यधत्त"॥

इत्यादौ रसादीनां नगरीवृत्तादिवस्तुमात्रेऽङ्गत्वं तत्र तेषामतात्पर्य्यविषयत्वेऽपि तैरेव गुणीभूतैः काव्यव्यवहारः। तदुक्तमस्मत्पौत्रकविपण्डीतमुख्यश्रीचण्डीदासपादैः। "काव्यार्थस्याखण्डबुद्धिवेद्यस्य तन्मयीभावेनास्वाददशायां गुणप्रधानभावावभासस्तावन्नानुभूयते कालान्तरे तु प्रकरणादिपर्य्यालोचनया भवन्नपसौ न काव्यव्यपदेशं व्याहन्तुमीशस्तस्यास्वादमात्रायत्तत्वादिति"। केचित् चित्राख्यं तृतीयं काव्यभेदमिच्छन्ति तदाहुः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

"शब्दचित्रं वाच्यचित्रमव्यङ्ग्यं त्ववरं स्मृतम्" ।

इति तन्न । यदि हि अव्यङ्ग्यत्वेन व्यङ्ग्याभावस्तदा तस्य काव्यत्वमपि नास्तीति प्रागेवोक्तम् । ईषद्व्यङ्ग्यत्वमिति चेत् । किं नाम ईषद्व्यङ्ग्यत्वम् । आस्वाद्यव्यङ्ग्यत्वम् अनास्वाद्यव्यङ्ग्यत्वं वा । आद्ये प्राचीनभेदयोरन्तःपातः । द्वितीये त्वकाव्यत्वम् । यदि चास्वाद्यत्वं तदा क्षुद्रत्वमेव । क्षुद्रतायामनास्वाद्यत्वात् । तदुक्तं ध्वनिकृता ।

"प्रधानगुणभावाभ्यां व्यङ्ग्यस्यैवं व्यवस्थिते ।
उभे काव्ये ततोऽन्यद्यत्तच्चित्रमभिधीयत इति" ॥

इति साहित्यदर्पणे ध्वनिगुणीभूतव्यङ्ग्याख्यकाव्यभेदनिरूपणो नाम चतुर्थः परिच्छेदः ॥ * ॥

अथ केयमभिनवा व्यञ्जना नाम वृत्तिरित्युच्यते ।

२६७, वृत्तीनां विश्रान्तेरभिधातात्पर्य्यलक्षणाख्यानाम्
अङ्गीकार्या तुर्य्या वृत्तिर्बोधे रसादीनाम् ॥

अभिधायाः सङ्केतितार्थमात्रबोधनविरताया न वस्त्वलङ्काररसादिव्यङ्ग्यबोधने क्षमत्वं न च सङ्केतितो रसादिः । न हि विभावाद्यभिधानमेव तदभिधानम् । तस्य तदैकरूप्यानङ्गीकारात् ॥ यत्र च स्वशब्देनाभिधानं तत्र प्रत्युत दोष एवेति वक्ष्यामः । क्वचिच्च "शृङ्गाररसोऽयम्" इत्यादौ स्वशब्दाभिधानेऽपि न तत्प्रतीतिः । तस्य स्वप्रकाशानन्दरूपत्वात् । अभिहितान्वयवादिभिरङ्गीकृता तात्पर्य्याख्या वृत्तिरपि संसर्गमात्रे परिचीणा न व्यङ्ग्यबोधिनी ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यच्च केचिदाहुः। "सोऽयमिषोरिव दीर्घदीर्घतरोऽभिधाव्यापारः" इति॥ यच्च ध्वनिकेनोक्तम्।

"तात्पर्य्याव्यतिरेकाच्च व्यञ्जकत्वस्य न ध्वनिः।
यावत्कार्य्यप्रसारित्वात् तात्पर्य्यं न तुलाधृतमिति"।

तयोरुपरि शब्दबुद्धिकर्म्मणां विरम्य व्यापाराभाववादिभिरेव पातनीयो दण्डः। एवञ्च किमिति लक्षणाप्युपास्या। दीर्घदीर्घतराभिधाव्यापारेणापि तदर्थबोधसिद्धेः॥ किमिति च "ब्राह्मण पुत्रस्ते जातः कन्या ते गर्भिणीत्यादौ" अपि हर्षशोकादीनामपि न वाच्यत्वम्। यत्पुनरुक्तं "पौरुषेयमपौरुषेयञ्च वाक्यं सर्व्वमेव कार्य्यपरम् अतत्परत्वेऽनुपादेयत्वादुन्मत्तवाक्यवत् ततश्च काव्यशब्दानां निरतिशयसुखास्वादव्यतिरेकेण प्रतिपाद्यप्रतिपादकयोः प्रवृत्त्यौपयिकप्रयोजनान्तरानुपलब्धेर्निरतिशयसुखास्वाद एव कार्य्यत्वेनावधार्य्यते यत्परःशब्दः स शब्दार्थ इति न्यायादिति"। तत्र प्रष्टव्यम्। किमिदं तत्परत्वं नाम। तदर्थत्वं वा तात्पर्य्यवृत्त्या तद्बोधकत्वं वा। आद्ये न विवादः। व्यङ्ग्यत्वेऽपि तदर्थतानपायात्। द्वितीये तु केयं तात्पर्य्याख्या वृत्तिः। अभिहितान्वयवादिभिरङ्गीकृता वा तदन्या वा। आद्ये दत्तमेवोत्तरम्। द्वितीये तु नाममात्रे विवादः। तन्मतेऽपि तुरीयवृत्तिसिद्धेः॥ नन्वस्तु युगपदेव तात्पर्य्यशक्त्या विभावादिसंसर्गस्य रसादेश्च प्रकाशनमिति चेन्न। तयोर्हेतुफलभावाङ्गीकारात्॥ यदाह मुनिः। "विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिरिति"। सहभावे च कुतः सव्येतरवि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

षाणयोरिव कार्य्यकारणभावः । पौर्व्वापर्य्यविपर्य्ययात् ॥ "गङ्गायां घोष इत्यादौ" तटाद्यर्थमात्रबोधनविरताया लक्षणायाश्च कुतः शीतत्वपावनत्वादिव्यङ्ग्यबोधकता । तेन तुरीया वृत्तिरुपास्यैवेति निर्विवादमेतत् ॥ किञ्च ।

२६८,

बोद्धृस्वरूपसङ्ख्यानिमित्तकार्य्यप्रतीतिकालानाम् आश्रयविषयादीनां भेदाद्भिन्नोऽभिधीयते व्यङ्ग्यः॥

वाच्यार्थव्यङ्ग्यार्थयोर्हि पदतदर्थमात्रज्ञाननिपुणैर्व्वैयाकरणैरपि सहृदयैरेव च संवेद्यतया बोद्धृभेदः॥ "भग्न धम्मिअ इत्यादौ" क्वचिद्वाच्ये विधिरूपे निषेधरूपतया । क्वचित् "निःशेषच्युतचन्दनमित्यादौ" निषेधरूपे विधिरूपतया च स्वरूपभेदः । "गतोऽस्तमर्क इत्यादौ" च वाच्योऽर्थ एक एव प्रतीयते । व्यङ्ग्यस्तु तद्बोद्धृभेदात् । क्वचित् "कान्तमभिसरेति" । "गावो निरुध्यन्तामिति" नायकस्यायमागमनावसर इति सन्तापोऽधुना नास्तीत्यादिरूपेणानेक इति सङ्ख्याभेदः ॥ वाच्यार्थः शब्दोच्चारणमात्रेण वेद्यः । एष तु तथाविधप्रतिभानैर्मल्यादिनेति निमित्तभेदः । प्रतीतिमात्रचमत्कारकरणाच्च कार्य्यभेदः । केवलरूपतया चमत्कारितया च प्रतीतिभेदः । पूर्व्वपश्चाद्भावेन च कालभेदः । शब्दाश्रयत्वेन शब्दतदेकदेशतदर्थवर्णसङ्घटनाश्रयत्वेन चाश्रयभेदः ॥

"कस्सणव होइ रोओ दट्ठ ण पिआइ सव्वाणं अहरं ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सभ्रमरपद्मगन्धाइणि वारिअवामे सहस्सएन्तिं"* ॥

इति सखीतत्कान्तविषयत्वेन विषयभेदः तस्मान्नाभिधेय एव व्यङ्ग्यः ॥ तथा।

२६९, प्रागसत्त्वाद्रसादेर्नो बोधिके लक्षणाभिधे।
किञ्च मुख्यार्थबाधस्य विरहादपि लक्षणा ॥

न बोधिकेति शेषः। न हि कोऽपि रसनात्मकव्यापाराद्भिन्नो रसादिपदप्रतिपाद्यः पदार्थः प्रमाणसिद्धोऽस्ति यमिमे लक्षणाभिधे बोधयेताम्। किञ्च यत्र "गङ्गायां घोष" इत्यादावुपात्तशब्दार्थानां बुभुक्षन्नेवान्वयोऽनुपपत्त्या बाध्यते तत्रैव हि लक्षणायाः प्रवेशः। यदुक्तं न्यायकुसुमाञ्जलावुदयनाचार्यैः ॥

"श्रुतान्वयादनाकाङ्क्षं न वाक्यं ह्यन्यदिच्छति।
पदार्थान्वय वैधुर्य्यात्तदाक्षिप्तेन सङ्गतिः"॥

न पुनः "शून्यं वासगृहमित्यादौ" मुख्यार्थबाधः ॥ यदि च "गङ्गायां घोष इत्यादौ" प्रयोजनं लक्ष्यं स्यात् तीरस्य मुख्यार्थत्वं बाधितत्वं च स्यात्तस्यापि च लक्ष्यतया प्रयोजनान्तरं तस्यापिप्रयोजनान्तरमित्यनवस्थापातः। न चापिप्रयोजनविशिष्ट एव तीरे लक्षणा। विषयप्रयोजनयोर्युगपत्प्रतीत्यनभ्युपगमात्। नीलादिसंवेदनानन्तरमेव हि ज्ञाततायाः अनुव्यवसायस्य वा सम्भवः।

---

* कस्सणवेति। कस्य न वा भवति रोषः पश्यतः प्रियायाः सव्रणमधरम्। सभ्रमरपद्माघ्रायिणि वारित वामे सहस्वेदानीम् ॥ इति सं० ॥ उपनायकदष्टाधरां पत्नीं तर्जयन्तं कान्तं प्रतारयन्त्याः सख्या उक्तिरियम् ॥ इति टी० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

२७०, नानुमानं* रसादीनां व्यङ्ग्यानां बोधनक्षमं।
आभासत्वेन हेतूनां स्मृतिर्न च रसादिधीः ॥

व्यक्तिविवेककारेण † हि "यापि विभावादिभ्यो रसादीनां प्रतीतिः सानुमान एवान्तर्भवितुमर्हति। विभावानुभावव्यभिचारिप्रतीतिर्हि रसादिप्रतीतेः साधनमिष्यते। ते हि रत्यादीनां भावानां कारणकार्यसहकारिभूतास्ताननुमापयन्त एव रसादीन्निष्पादयन्ति। तत्र बहिः प्रतीयमाना आस्वादपदवीङ्गताः सन्तो रसा उच्यन्ते इत्यवश्यंभावी तत्प्रतीतिक्रमः केवलमाशुभावितयासौ न लक्ष्यते यतोऽयमद्याप्यभिव्यक्तिक्रम इति" यदुक्तं तत्र प्रष्टव्यम्। किं शब्दाभिनयसमर्पितविभावादिप्रत्ययानुमितरामादिगतरागादिज्ञानमेव रसत्वेनाभिमतं भवतः तद्भावनया भावकैर्भाव्यमानः स्वप्रकाशानन्दो वा आद्ये न विवादः किन्तु रामादिगतरागादिज्ञानं रससञ्ज्ञया नोच्यते ऽस्माभिरित्येव विशेषः। द्वितीयस्तु व्याप्तिग्रहणाभावाद्धेतोराभासतयाऽसिद्ध एव। यच्चोक्तं तेनैव। "यत्र यत्रैवंविधानां विभावानुभावसात्त्विकसञ्चारिणामभिधानमभिनयो वा तत्र तत्र शृङ्गारादिरसाविर्भाव इति" सुग्रहैव व्याप्तिः पक्षधर्मता च। तथा।

---

* नाट्ये रसत्वेनाहार्यज्ञानविषये नटे काव्येतु रामे एव प्रथमं विभावादिभिरत्याद्यनुमानं ततस्तदनुमानाल्लोकोत्तरतया सामाजिकानां वासनारूपप्रत्याऽत्त्या साक्षात्कृती रामादिरत्याद्यङ्गी रस इत्याद्यङ्कमतानुयायिनां व्यक्तिविवेककारादीनां मतं दूषयति। नानुमानमिति ॥ टी० ॥

† तन्मतं दूषयितुं परिष्करोति। व्यक्तिविवेककारेण हीति। टी० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

"याऽर्थान्तराभिव्यक्तौ वः सामग्रीष्टा निबन्धनम् ।
सैवानुमितिपक्षे नो गमकत्वेन सम्मतेति" ॥

इदमपि नो न विरुद्धम् । न ह्येवंविधा प्रतीतिरास्वाद्यत्वेऽस्मनाकमभिमता किन्तु स्वप्रकाशमात्रविश्रान्तः सान्द्रानन्दनिर्भरः । तेनात्र विवक्षितादर्थादर्थान्तरस्य साधनाद्धेतोराभासता । यच्च "भ्रमधम्मिअ" इत्यादौ प्रतीयमानं वस्तु ।

"जलकेलितरलकरतलसुक्तः पुनः पिहितराधिकावदनः ।
जगदवतु कोकयूनोर्विघटनसङ्घटनकौतुकी कृष्णः" ॥

इत्यादौ च रूपकालङ्कारादयोऽनुमेया एव । तथा हि अनुमानं नाम पक्षसत्त्वसपक्षसत्त्वविपक्षव्यावृत्तत्वविशिष्टाल्लिङ्गाल्लिङ्गिनो ज्ञानम् । ततश्च वाच्यादसम्बन्धोऽर्थस्तावन्न प्रतीयते अन्यथातिप्रसङ्गः स्यादिति बोध्यबोधकयोरर्थयोः कश्चित्सम्बन्धोऽस्त्येव । ततश्च बोधकोऽर्थो लिङ्गं बोध्यश्च लिङ्गी बोधकस्य चार्थस्य पक्षसत्त्वं निबद्धमेव । सपक्षसत्त्वविपक्षव्यावृत्तत्वे अनिबद्धेऽपि सामर्थ्यादनुमेये । तस्मादत्र यद्वाच्यार्थाल्लिङ्गरूपाल्लिङ्गिनो व्यङ्ग्यार्थस्यावगमस्तदनुमान एव पर्यवस्यतीति" । तन्न । तथा ह्यत्र "भ्रम धम्मिअ इत्यादौ" गृहे स्वनिवृत्त्या विहितं भ्रमणं गोदावरीतीरे सिंहोपलब्धेरभ्रमणमनुमापयतीति यद्वक्तव्यं तत्र नैकान्तिको हेतुः । भीरोरपि गुरोः प्रभोर्वा निदेशेन प्रियानुरागेण च गमनस्य सम्भवात् । पुंश्चल्या वचनं प्रामाणिकं न वेति सन्दिग्धासिद्धेश्च । "जलकेलीत्यत्र" य आत्मदर्शनादर्शनाभ्यां चक्रवाकविघटनसङ्घटनकारी स

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चन्द्र एवेति अनुमितिरेवेयमिति न वाच्यम् । उच्चासका-दावनैकान्तिकत्वात् । एवंविधोऽर्थ एवंविधार्थबोधक एवं-विधार्थत्वाद्यन्नैवं तन्नैवमित्यनुमानेऽपि आभाससमानयोग-क्षेमो हेतुः । एवंविधार्थत्वादिति हेतुना एवंविधानिष्टा-र्थसाधनस्याप्युपपत्तेः । तथा यत् "दृष्टिं हे प्रतिवेशिनि क्षणमिहाप्यस्मदित्यादौ" नखग्रन्थीनां तनूलिखनम् एका-कितया च स्रोतोगमनं तस्याः परकामुकोपभोगस्य लि-ङ्गिनो लिङ्गमित्युच्यते तच्च तत्रैवाभिहितेन स्वकान्तस्ने-हेनापि सम्भवतीति अनैकान्तिको हेतुः । यच्च "निःशेष-च्युतचन्दनमित्यादौ" दूत्यास्तत्कामुकोपभोगोऽनुमीयते तत्किं प्रतिपाद्यया दूत्या तत्कालसन्निहितैर्वान्यैः तत्काव्या-र्थभावनया वा सहृदयैः । आद्ययोर्न विवादः । तृतीये तु तथाविधाभिप्रायविरहस्थले व्यभिचारः ॥ ननु वक्त्राद्य-वस्थासहकृतत्वेन विशेष्यो हेतुरिति न वाच्यम् । एवंविध-व्याप्त्यनुसन्धानस्याभावात् । किञ्चैवंविधानां काव्यानां कविप्रतिभामात्रजन्मनां प्रामाण्यानावश्यकत्वेन सन्दिग्धा-सिद्धत्वं हेतोः । व्यक्तिवादिना चाधमपदसहायानामेषां पदार्थानां व्यञ्जकत्वमुक्तं तेन च तत्कान्तस्याधमत्वं प्रामाणिकं न वेत्यपि कथमनुमानम् । एतेनार्थापत्ति-वेद्यत्वमपि व्यङ्ग्यानामपास्तम् । अर्थापत्तेरपि पूर्वसिद्ध-प्राप्तीच्छायामुपजीव्यैव प्रवृत्तेः । यथा ।

"यो जीवति स कुत्राप्यवतिष्ठते जीवति चात्र गोष्ठामवि-द्यमानश्चैत्र इत्यादि" ॥

किञ्च वस्त्रक्रयादौ तर्जनीतोलनेन दशसङ्ख्यादिवत्सूचन-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बुद्धिवेद्योऽप्ययं न भवति । सूचनबुद्धेरपि सङ्केतादिलौकिकप्रमाणसापेक्षत्वेनानुमानप्रकारताङ्गीकारात् । यच्च "संस्कारजन्यत्वाद्रसादिबुद्धिः स्मृतिरिति" केचित् तत्रापि प्रत्यभिज्ञायामनैकान्तिकतया हेतोराभासता । "दुर्गालङ्घितेत्यादौ" च "द्वितीयार्थो नास्त्येवेति" यदुक्तं महिमभट्टेन तदनुभवसिद्धमपलपतो गजनिमीलिकैव । तदेवमनुभवसिद्धस्य तत्तद्रसादिलक्षणार्थस्याशक्यापलापतया तत्तच्छब्दाद्यन्वयव्यतिरेकानुविधायितया च अनुमानादिप्रमाणावेद्यतया चाभिधादिवृत्तित्रयाबोध्यतया च तुरीया वृत्तिरुपास्यैवेति सिद्धम् । इयञ्च व्याप्त्याद्यनुसन्धानां विनापि भवतीत्यखिलं निर्म्मलम् । तत्किन्नामिकेयं वृत्तिरित्युच्यते ।

२७१, सा चेयं व्यञ्जना नाम वृत्तिरित्युच्यते बुधैः ।
रसव्यक्तौ पुनर्वृत्तिं रसनाख्यां परे विदुः ॥

एतच्च विविच्योक्तं रसनिरूपणप्रस्ताव इति सर्व्वमवदातम् ॥ * ॥

इति साहित्यदर्पणे व्यञ्जनाव्यापारस्थापनो नाम पञ्चमः परिच्छेदः ॥ ५ ॥

एवं ध्वनिगुणीभूतव्यङ्ग्यत्वेन काव्यस्य भेदद्वयमुक्त्वा पुनर्दृश्यश्रव्यत्वेन भेदद्वयमाह ।

२७२, दृश्यश्रव्यत्वभेदेन पुनः काव्यं द्विधा मतम् ।
दृश्यं तत्राभिनेयं तत्

तस्य रूपकसंज्ञाहेतुमाह ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

२७३, रूपारोपात्तु रूपकम् ॥

तद्दृश्यं काव्यं नटेरामादिस्वरूपारोपाद्रूपकमित्युच्यते ।

कोऽसावभिनय इत्याह ।

२७४, भवेदभिनयोऽवस्थानुकारः स चतुर्विधः ।
आङ्गिको वाचिकश्चैव माहार्य्यः सात्त्विकस्तथा ॥

नटैरङ्गादिभिरामयुधिष्ठिरादीनामवस्थानुकरणमभिनयः ॥ रूपकस्य भेदानाह ।

२७५,
नाटकमथ प्रकरणं भाणव्यायोगसमवकारडिमाः ।
ईहामृगाङ्कवीथ्यः प्रहसनमिति रूपकाणि दश ॥

किञ्च ।

२७६, नाटिका त्रोटकं गोष्ठी सट्टकं नाट्यरासकम् ।
प्रस्थानोल्लाप्यकाव्यानि प्रेङ्खणं रासकं तथा ॥
संलापकं श्रीगदितं शिल्पकञ्च विलासिका ।
दुर्म्मल्लिका प्रकरणी हल्लीशो भाणिकेति च ॥
अष्टादश प्राङ्ङ्रूपरूपकाणि मनीषिणः ।
विना विशेषं सर्व्वेषां लक्ष्म नाटकवन्मतम् ॥

सर्व्वेषां प्रकरणादिरूपकाणां नाटिकाद्युपरूपकाणाञ्च । तत्र ।

२७७, नाटकं ख्यातवृत्तं स्यात् पञ्चसन्धिसमन्वितम् ।
विलासद्धीरोदात्तगुणवद् युक्तं नानाविभूतिभिः ॥
सुखदुःखसमुद्भूतिनानारसनिरन्तरम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पञ्चादिका दशपरास्तत्राङ्काः परिकीर्त्तिताः ॥
प्रख्यातवंशो राजर्षिर्धीरोदात्तः प्रतापवान् ।
दिव्योऽथ दिव्यादिव्यो वा गुणवान्नायको मतः ॥
एक एव भवेदङ्गी शृङ्गारो वीर एव वा ।
अङ्गमन्ये रसाः सर्वे कार्य्यनिर्व्वहणेऽद्भुतम् ॥
चत्वारः पञ्च वा मुख्याः कार्य्यव्याप्तपरूपाः ।
गोपुच्छाग्रसमाग्रन्तु बन्धनं तस्य कीर्त्तितम् ॥

ख्यातं रामायणादि प्रसिद्धं वृत्तम् । यथा रामचरितादि॥ सन्धयो वक्ष्यन्ते । नानाविभूतिभिर्युक्तमिति महासहायम्। सुखदुःखसमुद्भवत्वं रामयुधिष्ठिरादिवृत्तान्तेष्वभिव्यक्तम् । राजर्षयो दुष्यन्तादयः । दिव्याः श्रीकृष्णादयः । दिव्यादिव्यो यो दिव्योऽप्यात्मनि नराभिमानी । यथा श्रीरामचन्द्रः । "गोपुच्छाग्रसमाग्रमिति क्रमेणाङ्काः सूक्ष्माः कर्त्तव्या इति" केचित् । अन्ये त्वाहुः । यथा गोपुच्छे केचिद्बाला ह्रस्वाः केचिद्दीर्घाः तथेह कानिचित् कार्य्याणि मुखसन्धौ समाप्तानि कानिचित् प्रतिमुखे । एवमन्येष्वपि कानिचित् कानिचिदिति" ॥

२७८ ,प्रत्यक्षनेतृचरितो रसभावसमुज्ज्वलः।
भवेदगूढशब्दार्थः क्षुद्रचूर्णकसयुतः ॥
विच्छिन्नावान्तरैकार्थः किञ्चित्संलग्नबिन्दुकः।
युक्तो न बहुभिः कार्यैर्बीजसंहृतिमान् न च ॥
नानाविधानसंयुक्तो नातिप्रचुरपद्यवान् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आवश्यकानां कार्य्याणामविरोधाद्विनिर्म्मितः॥
नानैकदिननिर्व्वर्त्यकथया सम्प्रयोजितः ।
आसन्ननायकः पात्रैर्युतस्त्रिचतुरैस्तथा ॥
दूराह्वानं बधो युद्धं राज्यदेशादिविप्लवः ।
विवाहो भोजनं शापोत्सर्गौ मृत्यूरतन्तथा ॥
दन्तछेद्यं नखछेद्यमन्यद् व्रीडाकरञ्च यत् ।
शयनाधरपानादि नगराद्युपरोधनम् ॥
स्नानानुलेपने चैभिर्वर्ज्जितो नातिविस्तरः ।
देवीपरिजनादीनाममात्यवणिजामपि ॥
प्रत्यक्षचित्रचरितैर्युक्तो भावरसोद्भवैः ।
अन्तर्निष्क्रान्तनिखिलपात्रोऽङ्क इति कीर्त्तितः॥

विन्दादयो वक्ष्यन्ते। आवश्यकं सन्ध्यावन्दनादि ॥ अङ्क-प्रस्तावाद् गर्भाङ्कमाह ।

२७९, अङ्कोदरप्रविष्टो यो रङ्गद्वारा मुखादिमान्।
अङ्कोपरः स गर्भाङ्कः सबीजः फलवानपि ॥

यथा बालरामायणे रावणं प्रति । कञ्चुकी ।

"श्रवणैः पेयमनेकैर्दृश्यं दीर्घैश्च लोचनैर्बहुभिः" ।
भवदर्थमिव निबद्धं नाट्यं सीतास्वयम्बरणम् ॥

इत्यादिना विरचितः सीतास्वयम्बरो नाम गर्भाङ्कः ॥

२८०, तत्र पूर्वं पूर्वरङ्गः सभापूजा ततः परम्।
कथनं कविसंज्ञादेर्नाटकस्याप्यथामुखम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्रेति नाटके।

२८१, यन्नाट्यवस्तुनः पूर्वं रङ्गविघ्नोपशान्तये।
कुशीलवाः प्रकुर्वन्ति पूर्वरङ्गः स उच्यते॥
प्रत्याहारादिकान्यङ्गान्यस्य भूयांसि यद्यपि।
तथाप्यवश्यं कर्त्तव्या नान्दी विघ्नोपशान्तये॥

अस्याः स्वरूपमाह।

२८२, आशीर्वचनसंयुक्ता नित्यं यस्मात् प्रयुज्यते।
देवद्विजनृपादीनां तस्मान्नान्दीति संज्ञिता॥
मङ्गल्यशङ्खचन्द्राब्जकोककैरवशंसिनी।
पदैर्युक्ता द्वादशभिरष्टभिर्वा पदैरुत॥

अष्टपदा यथा। अनर्घराघवे "निष्प्रत्यूहमित्यादि॥
द्वादशपदा यथा मम तातपादानां पुष्पमालायाम्।"
"शिरसि धृतसुरागे स्मरारावरुणमुखेन्दुरुचिर्गिरीन्द्रपुत्री।
अथ चरणयुगानते स्वकान्ते स्मितसरसा भवतोऽस्तु भूतिहेतुः"॥

एवमन्यत्र। "एतन्नान्दीति" कस्यचिन्मतानुसारेणोक्तम्। वस्तुतस्तु "पूर्वरङ्गस्य रङ्गद्वाराभिधानमङ्गमिति" उच्यते। यदुक्तम्। "यस्मादभिनयो ह्यत्र प्रायस्यादवतार्य्यते।
"रङ्गद्वारमतो ज्ञेयं वागङ्गाभिनयात्मकमिति"।

उक्तप्रकारायाश्च नान्द्या रङ्गद्वारात् प्रथमं नटैरेव कर्त्तव्यतया न महर्षिणा निर्देशः कृतः। कालिदासादिमहाकविप्रबन्धेषु च।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

"वेदान्तेषु यमाहुरेकपुरुषं व्याप्य स्थितं रोदसी
यस्मिन्नीश्वर इत्यनन्यविषयः शब्दो यथार्थाक्षरः ।
अन्तर्यश्च मुमुक्षुभिर्नियमितप्राणादिभिर्दृश्यते
स स्थाणुः स्थिरभक्तियोगसुलभो निःश्रेयसायास्तु वः" ॥

एवमादिषु नान्दीलक्षणायोगात् । उक्तञ्च "रङ्गद्वारमारभ्य कविः कुर्यादिति"। अत एव प्राक्तनपुस्तकेषु "नान्द्यन्ते सूत्रधार" इत्यनन्तरमेव "वेदान्तेष्वित्यादि" श्लोकलिखनं दृश्यते । यच्च पश्चात् "नान्द्यन्ते सूत्रधार" इति लिखनं तस्यायमभिप्रायः "नान्द्यन्ते सूत्रधार इदं प्रयोजितवान् इतः प्रभृति मया नाटकमुपादीयत इति कवेरभिप्रायः सूचित इति" ॥

२८३, पूर्व्वरङ्गं विधायैव सूत्र[illegible] निवर्त्तते ।
प्रविश्य स्थापकस्तद्वत् काव्य[illegible] स्थापयेत्ततः ॥

दिव्यमर्त्येषु तद्रूपो मिश्रमन्यतरस्तयोः ।
सूचयेद्वस्तु वीजं वा मुखं पात्रमथापि वा ॥

काव्यस्यार्थस्य स्थापनात् स्थापकः । तद्वदिति सूत्रधारसदृशगुणाकारः । इदानीं पूर्व्वरङ्गस्य सम्यक्प्रयोगाभावादेक एव सूत्रधारः सर्व्वं प्रयोजयतीति व्यवहारः । स स्थापको दिव्यं वस्तु दिव्यो भूत्वा मर्त्यं मर्त्यो भूत्वा मिश्रञ्च दिव्यमर्त्ययोरन्यतरो भूत्वा सूचयेत् । वस्त्वितिवृत्तं यथोदात्तराघवे ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

"रामो मूर्ध्नि निधाय काननमगान्माखामिवाज्ञां गुरो-
रङ्गत्या भरतेन राज्यमखिलं भात्रा सहैवोज्झितम् ।
तौ सुग्रीवविभीषणावनुगतौ नीतौ परां सम्पदं
प्रोत्सिक्ता दशकन्धरप्रभृतयो ध्वस्ताः समस्ता द्विषः ॥"

बीजं यथा रत्नावल्याम् ।

"द्वीपादन्यस्मादपि मध्यादपि जलनिधेर्दिशोऽप्यन्तात् ।
आनीय झटिति घटयति विधिरभिमतमभिमुखीभूतः ॥"

अत्र हि समुद्रे वह्नितभङ्गमग्नोत्थिताया रत्नावल्या
अनुकूलदैवलालितो वत्सराजगृहप्रवेशो यौगन्धरायण-
व्यापारसारभ्य रत्नावलीप्राप्तौ बीजम् । मुखं श्लेषादिना
प्रस्तुतवृत्तान्तप्रतिपादको वाग्विशेषः । यथा ।

"आसादितप्रकटनिर्मलचन्द्रहासः
प्राप्तः [illegible] एष विशुद्धकान्तः ।
उत्खाय [illegible] तमसं घनकालमुग्रं
रामो दशास्यमिव सम्भृतबन्धुजीवः ॥"

पात्रं यथा शाकुन्तले ।

"तवास्मि गीतरागेण हारिणा प्रसभं हृतः ।
एष राजेव दुष्मन्तः सारङ्गेणातिरंहसा ॥"

२८४, रङ्गं प्रसाद्य मधुरैः श्लोकैः काव्यार्थसूचकैः ।
रूपकस्य कवेराख्यां गोत्राद्यपि स कीर्त्तयेत् ॥
वृत्तञ्च कञ्चित्प्रायेण भारतीं वृत्तिमाश्रितः ।

स स्थापकः । प्रायेणेति क्वचिद्वृत्तोत्कीर्त्तनमपि ।
यथा रत्नावल्याम् । भारतीवृत्तिस्तु ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu